आपस्तम्बसूत्रं:

[illegible]

प. ३२ पं. ८

श्रीमते रामानुजाय नमः॥ श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी वेदान्ताचार्यवर्यो मे सन्निध
त्तां सदा हृदि॥ इह खलु भगवान् कवितार्किकसिंहः सर्वतंत्रस्वतंत्रः श्रीमान्वेंकटनाथार्यः वेदांताचार्य
वर्यः रहस्यत्रयसाराख्योधिकारार्थसंग्रहेण शिष्यबुद्धिसमाधानं कुर्वन् आदावाचार्यप्रणामरूप
मंगलव्याजेन स्वरूपयाथात्म्यज्ञानं प्रार्थयते प्रपदनमये इति विद्याभेदे प्रपदनमये प्रथमुपायत्वेन
प्रमाणप्रसिद्धे प्रपदने इत्यर्थः स्वार्थे मयट् तत्र प्रतिष्ठितचेतसः स्थिरचित्ताः अनेन महाविश्वास
सूचितः दयाधनाः कृपामात्रप्रसन्नाः शिष्यानुवृत्तिनिरपेक्षा इत्यर्थः शठरिपुगुरुव्याससाचेतसादि

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः प्रतिपदमिह प्रज्ञादायं दिशंतु दयाधनाः शठरिपुगुरुव्या
ससाचेतसादिनिबंधनश्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः १ नानानिबंधनेषु प्रबंधेषु प्रमा
णेषु क्रमेण संतताभ्यासेन परिणतया कर्मज्ञानयोरंगत्वात् भक्तेश्चात्राधिकारत्वाच्च अनुपायत
या प्रपत्तिरेवानुरूपोपाय इत्येवंविधश्रद्धया परिपक्वया शुद्धया शुद्धः निस्संशयः आशयो येषां ते
तथोक्ताः देशिकाः मम ज्ञानादिगुणरहितस्य प्रकृष्टज्ञानं प्रज्ञा तदीयत्रोपत्वज्ञानं पदे पदे प्रतिपदं
संततमित्यर्थः दिशंतु यद्वा पद्यते प्राप्यत इति पदं प्राप्यं तं प्रति प्रज्ञादायं त्वराख्यं ज्ञानं अथवा
विद्याभेदे प्रपदनमये अप्रतिष्ठितचेतसः चंचलचित्तस्य प्रज्ञादायं अमोघत्वानन्यापेक्षत्व
शरण्याभिमतत्वलक्षणमात्रनिष्ठारत्वादिज्ञानं इह इदानीमेव दिशंतु इदं तु प्रार्थनायां लेट्

अनंतरं तेषामुत्कर्षमास्ते हयेति हयग्रीवाज्ञानानुष्ठानपूर्णत्वया सर्वमनोहराहदेवपर्यंतदेवसिंहास
नमिति रूपितं रूपकं तस्मिन् रसिकसं आसक्तस्स हयग्रीवस हेषैवऊर्मिघोषः तरंगध्वनिः ते
नक्षिप्ता निराकृता प्रत्यर्थिनां प्रतिवादिनां दृप्तिर्मदो यया सा तथोक्ता देशिकदृप्तानामपि
दिग्विजयमुखेन निरास इत्याह दिक्सौधेति दिश एव सौधाहर्म्याणि तेषां वल्लभानां स्थापि॥

हयास्यत्वसिंहासनरसिकहयग्रीवहेषोर्मिघोषक्षिप्तप्रत्यर्थिदृप्तिर्जयति वकुगुणापंक्तिरस्मद्गुरू
णां दिक्सौधावरुजैत्रध्वजपटपवनस्फातिनिर्धूततत्तत् सिद्धांतस्तोमतूलस्तबकविगमनव्यक्त
सद्वर्तनीका ॥

तानां जैत्राणां जयसूचकानां ध्वजानां पटपवनस्य पटसंबंधिवायोः स्फात्या वेगेन निर्धूतानित
त्तत्सिद्धांतानां स्तोमाः समूहाः त एव तूलस्तबकानि कार्पासराशयः तेषां विगमनेन विना
शेनेन व्यक्ता विशदा सद्वर्तनीमन्मार्गो यस्याः सा तथोक्ता वकुगुण एव मुक्तसमस्तकल्या
णगुणा अस्मद्गुरूणां पंक्तिः अस्मदाचार्यप्राचार्याणां परंपरा जयति सर्वोत्कर्षेणाव
र्तंते ॥ श्रीमते रामानुजाय नमः श्री श्री श्री

इदानीं स्वस्य तेषु विश्वासं प्रार्थयते एते इति एते अविच्छिन्नसंप्रदायाः नाथादयः देशिकाः त्रय्यन्तैर्वेदान्तैः
वेदान्तवाक्यप्रमाणैः प्रतिनन्दनीयाः श्रोतव्याः विविधाः स्वरूपोपायपुरुषार्थप्रतिपादकतया नाना
विधाः उदन्ताः उपदेशवाक्यानि येषां ते तथोक्ताः श्रद्धातव्ययोर्वात्सल्यसौशील्यादिविशिष्टतया वि
श्वसनीययोः शरण्ययोः उपेतव्ययोर्दिव्यदंपत्योः अनेन विशिष्टस्यैवोपायत्वमिति सूचितं तयोर्द
यासेव दिव्यापगा मन्दाकिनी तस्या व्यापकाः तत्पात्रभूता इत्यर्थः स्पर्धया परस्परजिगीषया विप्लवः

एते महत्समपोढमन्मथशरोन्माथाय नाथादयस्त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह श्र
द्धातव्यशरण्यदंपतिदयादिव्यापगाव्यापकाः स्पर्धाविप्लवविप्लवं जपदवीवैदेशिकाः देशिकाः

२

उपप्लवः यस्यां सा च विप्लवं ज्ञानां कुमतीनां पदवी च तस्यां वैदेशिकाः विमुखाः त्रय्यन्तेत्यादिवि
शेषणत्रयेण यथाक्रमं ज्ञानभक्तिवैराग्याणि सूचितानि देशिका नाथादयः अस्मद्गुरुपर्यन्ता इत्य
र्थः अपोढः तिरस्कृतः मन्मथशरैरुन्माथः पराभवो येन तस्मै अनेन आचार्यकृपाहेतुभूतं
विष्णोः कटाक्षाद्वेषादिश्यमाण प्रतिपादितमद्वेषादिकं सूचितं यद्वा मन्मथशरोन्माथाय वि
रक्तकामशरविकारायेत्यर्थः इह वात्सल्यैकविषयाय मह्यं स्वदन्तां एवं तां तेषु मम विश्वासो भ
वत्वित्यर्थः २ ॐ नमो भगवते वासुदेवाय नमः ॥ ॥

धिपरिणतिभेदात् नाग्यपरिपाकविशेषात् तेन भगवता काले जननकाले विहितः गुरुः परिषस्नः
उपहृतं स्वेन गृहीतं स्वं मंत्राख्यं द्रव्यं आप्य गोपायति मंत्रं प्रयत्नेन गोपयेदिति स्मरणात् ५ अथ पू
र्वोक्तविधिपरिपाकस्य सर्वसिद्धांतसिद्धत्वं प्रदर्शन् उपपन्नस्य प्रपत्तुः तत्कालगुणानुभवैकं कर्मा
दिरूपप्रवृत्तेर्मुक्तवर्ज्जोपपत्तां प्रतिपादयन् तादृशाधिकारिणो दुर्लभतामाह कर्माविद्यादीति पुरुषं
पुरुषं प्रति इति प्रतिपुरुषं तत्तत्पुरुषभेदेन कर्माविद्यादीनां चक्रे समूहे आदिशब्देन संसा
रउच्यते अविद्याशब्देन अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः अविद्यातरुसंभूतिवी

कर्माविद्यादिचक्रे प्रतिपुरुषमिदानादिचित्रप्रवाहे तत्तत्काले विपंक्ति र्भवति हि विविधा सर्व
सिद्धांतसिद्धा तल्लब्धस्वावकाशा प्रथमगुरुदयागृह्यमाणः कदाचिन्मुक्तैश्वर्यमितसंपन्निः
धिरपि भविता कश्चिदित्थं विपश्चित् ६

जमेतत् हि धाम्स्थितमित्युक्ताः अविद्योच्यते अना
दिः तेषां कर्मादीनां त्रयाणां घटीयंत्रन्यायेन पुनः पुनरुत्पत्ता अनादिश्च चित्रः पुरुषभेदान्नाना
विधप्रवाहो यस्य तस्मिन् तथोक्ते सति तत्तत्काले अनुभवोन्मुखकाले विविधा कर्मभेदान्नानावि
धा सर्वेषु सिद्धांतेषु सिद्धा संप्रतिपन्ना विपंक्तिः परिपाकः भवति हि भवस्येव तत्तेन सुकृतपरिपाके
न लब्धः प्राप्तः सावकाशो यया सा च प्रथमगुरुकृपा च तया कदाचित् गृह्यमाणः एवमुक्ते श्व
र्यमंते यस्याः सा च सा संपद्गुणानुभवैकं कर्यरूपा प्रवृत्तिः तस्या निधिः निक्षेपस्थानमपि भविता

3

अथक्रियमाणग्रंथस्यमोक्षएवपरमप्रयोजनमितिपरान्प्रत्युपदिशतितत्पोद्घाताधिकारः पटलेति
हेसुधियःसारासारविवेकज्ञाः जननपदव्यांसंसारमार्गेगतागतेषुयातेषुजंघालत्वंदीर्घपादत्वंवे
गमितियावत्जिहासंतः हातुमिच्छंतोयदितर्हिरहस्यत्रयसाराड्हूतं रहस्यत्रयसाराख्यग्रंथा
त्सारतमत्वेनपृथक्कृतं अधिकाराःसंग्रहं ते अस्मिन्निति अधिकारसंग्रहसारग्रंथपवतजपत
पटलेसनेनजपोच्चारणमात्रेमेवालंनार्थज्ञाननिबंधइतिव्यजते अर्थानित्यस्य रित्यस्य चेतनः

पवतरहस्यत्रयसाराड्हूतमधिकारसंग्रहंसुधियः जननपदवीगतागतजंघालत्वंजिहासंतः ध
मणिवरइवशौरेर्निसहृद्योपिजीवः कलुषमतिरविंदनकिंकरत्वाधिराज्यंविधिपरिणतिभेदा
द्दीक्षितस्तेनकाले गुरुपरिषदुपज्ञंप्राप्यगोपायतिस्व ५ स एतादृशपुरुषार्थानुपलब्धौहेतुं
दर्शयन्उत्तरत्नत्पुरुषार्थलब्धयेगुरुपरंपराप्राप्तमंत्राख्यद्रव्यमेवसाधनमितिवक्तुकामस्त
त्साधनंचभगवत्जायमाणकटाक्षादिकमित्याह मणिवरेतिजीवः चेतनः शौरेः पुरुषोत्तमस्यम
णिवरइवकौस्तुभइवनिसहृद्योपिनितांतमनोहरोपि अनेनजीवस्यसंसारानर्हत्वंकौस्तुभाभि
मानिदेवतात्वंचसूचितंकलुषमतिः अनादिकर्मवासनयासंकुचितज्ञानः किंकरत्वंकैंक
र्यंतदेवाधिराज्यंसार्वभौमत्वंअविंदन्अलभमानःवि ॥ ॥

नामितित्रुणखानांवेदांतानांउपरिऽग्रभागेउपनिषद्भिरर्थः स्थितेनमूलेनमनुनामूलमंत्रेणलब्धः
ज्ञातःआत्मास्वरूपंयेनसः तथोक्तस्यसत्ताहेतुसकृज्जपेनसत्तायाःपुरुषार्थसिद्धेः हेतुःसकृ
ज्जपेनसकृज्जपोयस्यतेनहृद्येनमंत्ररत्नेनसकृदेवहित्रुणस्यार्थः कृतोयंतारयेत्वरमितुक्त्या
सकृज्जपःपुरुषार्थहेतुःजपांतरंतुकालक्षेपार्थमितिभावः सकलंकालंमोक्षपर्यंतंका।
लंहृद्येनद्विपन्वेदानामुत्तंसाः कर्णभूषणानिवेदांताइतियावत् तेषुविहारोयस्यसचा

4

त्रुणखानामुपरिस्थितेनमनुनामूलेनलब्धात्मकःसत्ताहेतुसकृज्जपेनसकलंकालंहृद्येनद्वि
पन्वेदोत्तंसविहारसारथिदयागुंफेनविस्रंभितःसारज्ञोयदिकश्चिदस्तित्रुवनेनाथस्सयू
थस्यनः ॰

सौसारथिःकृष्णः तस्यदयायागुंफःपरिपाकश्चरमश्लोकः तेनविस्रंभितःसं
जातविश्वासःनैर्भर्यकाष्ठायुक्तइतियावत्मूलमंत्रेणस्वरूपंज्ञात्वाहृद्येनसत्तांसंपाद्य
तेनैवकालक्षेपंकुर्वन्चरमश्लोकेनविश्वासयुक्तःसारज्ञःकश्चिद्भुवनेअस्तियदिस
यूथस्यपरिजनस्यएवनःनाथःअस्माकंस्वामीति ॰ ॥ ॥

उपायापायसंबंधरहितस्वरूपानुरूपज्ञप्तिज्ञापकात्मकमूलमंत्र एवपूर्वैरनुसंहितमित्याहश्रु
तिसारनिष्कर्षाधिकारः श्रुतिपथेति श्रुतिपथविपरीतंनहिंस्यात्सर्वभूतानिनकलंजंभ
क्षेन्नानृतंवदेद्धिंसादिवेदमार्गविरुद्धंहिंसादिरूपंकर्मक्ष्वेलकल्पंविषतुल्यमितियावत्
श्रुतौचज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादिविधिविधायकश्रुतौससामपिप्रकृतिपुरुष
योर्देहात्मनोर्योगस्यपुनःसंबंधस्यज्ञापकांशोज्योतिष्टोमादिरूपसाधनविशेषःपथ्यो

श्रुतिपथविपरीतंक्ष्वेलकल्पंश्रुतौचप्रकृतिपुरुषयोगज्ञापकांशोनपथ्यःतदिहविबुधगुप्तं
मृत्युभीताविचिन्वंत्युपनिषदमृताब्धेरुद्धृतंसारमार्याः ५ नपुनःसंसारापादकत्वादात्महितो
नभवतितस्मात्कारणात्तदुपायापाययोःस्वरूपज्ञप्तिकरत्वात्मृत्युभीताःप्रकृतिसं
बंधभीताःआर्याःआचार्याःआत्मानात्मज्ञाःइहसंसारदशायांविबुधैर्ज्ञानिभिर्गुप्तंसुरक्षितं
उपनिषदमृताब्धेःवेदांतग्रंथसमुद्रस्यउत्तमंश्रेष्ठंप्रधानमितियावत्उद्धृतमितिवापाठःउ
द्धृतंमथितंसारंमंत्राख्यंविचिन्वंतिप्रार्थयंते ५ अथरहस्यत्रयार्थज्ञानवतःहसंतिका
पंकजन्मायेनदृष्टंमतांवदन्सपरिजनस्यतस्यसर्वातिशायित्वमाहशाखा श्रीरामः

अधि० ५

पूर्वश्लोकोक्तकस्तूरीरजरीरोमावसंबंधस्यभाष्यादिभिः परवादिनिरसनमुखेन सुनिश्चितत्वात्भ
गवत्भाष्यकारेश्च तत्कारमनुसंधेत्ते पद्येऽस्ति पतिसार्वभौमेन भगवद्भाष्यकारेण कथितं
अविद्या अनात्मन्यात्मबुद्धिरूपसेवतमः तस्यप्रत्यूर्षं निवर्तकमिति भावः एवंसकल
प्रमाणानुग्रहीतं प्रतितंत्रप्रसिद्धतत्र सिद्धांतं अंतिमयुगे कलियुगे कश्चिद्दिपश्चित्

यद्येतंयतिसार्वभौमकथितंविद्यादविद्यातमः प्रत्यूर्षंप्रतितंत्रमंतिमयुगेकश्चिद्दिपश्चि
त्तमः तत्रैकत्रझटित्युपैति विलयं तत्तन्मतस्थापनाहेवाकप्रथमानहेतुककथाक
ल्लोलकोलाहलः १०

मः ज्ञानाधिकत्तमः विद्यायुदिजानीद्याद्युदि तत्रैकत्रएकस्मिनत्त्वानिनितमतत्तेषांते।
षांमतानांस्थापनानिर्वाहः तस्मिन्हेवाकेऽत्युत्सुकेन प्रथमानानांप्रवृत्तानां हेतुः
कानां हेतुवादिनांकथावादाः तएवकल्लोलाः तेषां कोलोहलः घोषविशेषः झटिति
शीघ्रमेवविलयंविनाशमुपैतिविनाशंप्राप्नोतीतियावत् १० ॥ ॥

रुसः ५

अथमूलमंत्रार्थपरिज्ञानेनैववेदांततात्पर्यमपिनिश्चेतुंशक्यतइत्याह इतितंत्रसारोद्धाराधि॰
कारः आधेयत्वेतिव्यापकोमूलमंत्रः तस्यव्यापकवस्तुप्रतिपादकत्वाद्व्याहारंविनाअर्थ
प्रतिपादकत्वाच्चव्यापकत्वंसएवआदर्शोदर्पणंतस्मिन्दृष्टिर्यस्यसः तादृशः पुरुषःविश्वं
चेतनाचेतनात्मकंजगत् आधेयत्वंधार्यत्वं प्रतिपत्तिर्यापांतेतेचतेनियमाधर्माः प्रवृत्तिश्चादि

आधेयत्वप्रवृत्तिनियमैरादिकर्तुश्शरीरं सत्तास्थेमप्रपतनफलेषेतदायत्तमेतत् विश्वंप
रूपन्नितिभगवतोव्यापकादर्शदृष्टि र्गम्भीराणामकृतकगिरांगाहतेचित्तवृत्तिं ए

नत्रोषत्वनियाम्यत्वयोग्रहणंयन्नियाम्यंयच्छार्यमियच्चोषभूतंतत्तस्यशरीरमितिलक्षणात्
एतैर्नियमैरादिकर्तुर्भगवतश्शरीरमितिप्रपन्नजानन् एतज्जगतस्सत्तास्थेमप्रपतनफ
लेषुसत्तास्थितिप्रपतनफलेषुविषयेषुएतत् एतस्यभगवतः आयत्तमधीनमितिच
प्रपन्नजानन् गंभीराणांदुर्बोधानांअकृतकगिरांअपौरषेयवाचांवेदांतानांचित्तवृत्तिंता
त्पर्यंगाहते अनायासेनजानाति ए

णसमानमितियावत् द्वयमपि विदन् जानन् गुरुरूपस्य सर्ववेदी सर्वज्ञ इति संमतः सर्वलोकसंग्र
तिपत्रो भवति अर्थपंचकस्यैव सकलशास्त्रप्रतिपाद्यत्वेन तत्ज्ञानवान्सर्वज्ञो भवत्येवेति भावः
११ पूर्वश्लोकोक्तमर्थपंचकं स्वानुष्ठानमुखेन विशिष्य निरूपयति प्राप्यमिति समस्तस्य चेतनात्मक
स्य जगतः शेषी स्वामी तत्र हेतुमाह परममिति निखिलहेयप्रत्यनीककल्याणैकतानतया सर्वोत्तर
मित्यर्थः ब्रह्म प्राप्यं न स्वर्गादयः तेषां हेयप्रत्यनीकताद्यभावेन प्राप्याभासरूपत्वात् अहं शेषभू
तः अस्य परब्रह्मण उचितः निरुपाधिकं प्राप्ता तदनुभवजनितप्रीतिकारितकैंकर्यरूपफलभा

प्राप्यं ब्रह्म समस्तशेषि परमं प्राप्ताहमस्योचितः प्राप्तिर्दायधनक्रमादिह मम प्राप्या स्वतस्सुखित
दं तेनार्तिहृत्त्ववानहमहंमत्याविमत्याश्रयः सेतुस्संप्रति शेषिसंपदि भरन्यासस्तु मे शिष्यते १२

क मम प्राप्तुः प्राप्तिः प्राप्तिफलं कैंकर्यमितियावत् दायधनक्रमात् ज्ञातित्वप्राप्तधनन्यायेन सुखित
त्त्वतः उपाधिं विना प्राप्ताऽहं अहं अहो देहात्माभिमानस्वतंत्राभिमानरूपायाविमतेः विपरीत
ज्ञानस्य आश्रयः सन् अहंमत्या स्वरद्विणे स्वप्रवृत्त्या ममकाररूपया कुध्या एनां प्राप्तिं अतिहृत्त्ववान्
अतिक्रान्तोऽस्मि इदं तेनेति खेदे संप्रति संसारदशायां मे मम शेषभूतस्य शेषिसंपदि कैंकर्यरूपसाम्राज्यवि
षये भरन्यासः प्रपत्तिः सेतुः संसारोत्तारसाधनं शिष्यते न त्वन्यदधिकाराभावात् प्रपत्तिरेव परिशि
ष्यत इति भावः परमपुरुषः प्राप्यः प्राप्ता भगवत्कैंकर्यं प्राप्तिफलं तद्विरोधिनावहंकारममका

अनेनमूलमंत्रेणअप्पसब्रह्मणोरूपमित्यादिप्रमाणप्रतिपादितमर्थपंचकंप्रतिपाद्यतइत्या
द् अर्थपंचकाधिकारस्संगृह्यते आदौअप्पमिति आदौ अकार आदिर्यस्तस्मिन् अ
दिग्राहेणनारायणपदमुच्यते प्रणवस्थे अकारेनारायणपदेच अनघंनिखिलहेयप्रत्य
नीकंपरमंसकलकल्याणगुणैकतानंअप्पब्रह्मस्वरूपंव्यंजयंतमित्यनेनसंबंधः मकारादिर्यस्
तस्मिन्मादौ आदौग्राहेणनारपदंलुप्तचतुर्थीचप्रतिपादितेमकारेनारेपदेचतुर्थ्याचप्राप्तजीव
स्यस्वरूपमस्यापिव्यंजयंतमित्यनेनसंबंधः अयननमसोः अयनपदेनमः पदेचइष्टस्यपरमपु

आदौप्राप्यंपरमनघंप्राप्तरूपंचमादाविष्टोपायंत्वयननमसोरीप्सितार्थेचतुर्थ्यांतद्व्याघातं
ममकृतिगिरिंव्यंजयंतंमनुंतंतत्पायंचद्वयमपिविदन्सम्मतस्सर्ववेदी ११ इष्टार्थस्योपा
यंव्यंजयंतंनारमयतिप्राप्यतीतिव्युत्पत्त्या अयनग्राहेस्योपायवाचकत्वगत्या धर्मेनंनारणंना
रणंप्रपुरुषर्षभाः इत्युपदेशानंतरंशेषपद्यासहितास्सर्वेनमस्कुर्वंतुजनार्दनमित्यनुष्ठानश्लोकेनार
णग्राहस्थानेनमः पदप्रयोगात्नमः पदस्यापिस्थानप्रमाणायेनउपायवाचकत्वंसिद्धं चतु
र्थ्याव्यक्तचतुर्थ्याईप्सितार्थईप्सितमर्थप्राप्तिफलंकैंकर्यमितियावत् ममकृतिगिरिनमः पद
स्थेमकारेअहंकारेममकारात्मकंतद्व्याघातंतस्यकैंकर्यस्यव्याघातंविरोधिनंचव्यंजयंतंप्र
तिपादयंतंतंसकलवेदांतसारभूतंमनुंमूलमंत्रंतत्पायंतेनमनुनात्मसमर्थपंचकप्रतिपाद
कत्वेनमंत्रे

अधि०
७

अथ षट्तत्त्वषोडशतत्त्ववादादिकं तत्त्वत्रयज्ञानवतां निराकर्तुं त्राक्यतद्रूपमाह आवायोद्धप
तइति तत्तदर्थेषु तेषु तेष्वर्थेषु विषयेषु आवायोद्धपतः आकर्षणविकर्षणमंजायमा
नयोः अस्तिनास्त्योरनंत्यात् कविधीवत् कविबुधिवत् चित्रवत् चित्रकर्मवच्च निरवधीनां
कदनां युक्तीनां कुतर्काणां कांतामनोहराः कृतांताः सिद्धांतानि कतिकतिसुः अनेक

7

आवायोः द्धपतः स्युः कतिकतिकविधीचित्रवत् तत्तदर्थेष्वानंत्यादस्तिनास्त्योरनवधिकु
हनायुक्तिकांताः कृतांताः तत्त्वालोकसंघुव भवति सहसानिःसमस्तान् समस्तान् पुनः
स्वे तत्त्वेन दृष्टेन च भवति पुनः शालितास्याएकताधीः १४

धाभवेयुरिति यावत् तानि सिद्धांतानि सहसालोप्तुं निराकर्तुं तत्त्वालोकः निःसमस्तान्
समस्ताश्च भवति पुनः संत्रायमानां क्वालोकदृष्टांतमुखेन निराकरोति पुंस्त्वे तत्त्वेनय
थार्थेन दृष्टे सति प्राणीवास्याएकवेतिधीः पुनश्च न भवति १५ श्रीरामायनमोनमः

कृ०स०:
७

तत्त्वत्रयाधिकारसंग्रह्यते मुमुक्षूणां ज्ञातव्यं तत्त्वत्रयमपि पूर्वाचार्यैः सुनिश्चित्योपदिष्टमित्याह
प्रकृत्यात्मेति चिल्लक्षणानि स्वयंप्रकाशत्वनित्यत्वादीनि अचिल्लक्षणानि जडत्वपरिणामित्वादी
नि तेषां धिया विवेकेन प्रकृतौ देहे आत्मेति भ्रान्तिः देहात्मभ्रमः गलति नश्यतीत्यर्थः तद्वज्जीवे
शेशैक्यं जीवब्रह्मैक्यं भ्रान्तिर्यस्य सत्त्वात्मैकलह्भ्रान्तिशब्देन परिणमवादादिकसूचनेतत्तन्नयो
जीवेश्वरयोर्विभजनात् असाधारणधर्मवत्तया निरूपणात् जीवासाधारणधर्माः नियाम्यत्वशेष

प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया तथा जीवेशैक्यभ्रान्तिकलहस्तद्विभजनात् अ
तो मोक्ता भोग्यं प्रति तदुभयनियन्तेति निगमैर्विभक्तं नस्तत्त्वत्रयमुपदिष्टं सत्तधियः ॥२॥

त्वादयः ईशासाधारणधर्मास्तु नियन्तृत्वशेषित्वादयः तेषां विभजनेन बाह्यान्तरकलहो गल
तीत्यर्थः अतः विपरीतज्ञानस्य निरस्तत्वात् भोक्ता जीवः भोग्यं प्रकृतिः तत्तयोरुभयोः प्रकृ
तिपुरुषयोर्नियन्ता ईश्वर इत्यनेन प्रकारेण निगमैस्त्रयपदैर्विभक्तं पृथक्कृत्य निरूपितं तत्त
त्वानां चिदचिदीश्वराणां त्रयं अस्मत्सत्तधियः समग्रज्ञाना नाथादयः जिज्ञासूनामस्माकमुप
दिष्टमिति ॥२॥ ॐ नमो भगवते वासुदेवाय नमः ॥ ॥

अधि० ८

8

ननु अखिलतनुरित्यनेन भगवतः ब्रह्मरुद्रादीशरीरकत्वमुक्तं तन्न संगच्छते वैपरीत्यस्यापि श्रुवच
त्वादित्याशंक्य नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते एको ह वै नारायण आसीन्न ब्रह्मा नेशानो ने
मे द्यावापृथिवी इत्यादिना ब्रह्मादीनां स्रजत्वसंहार्यत्वश्रवणात् तद्वैपरीत्यशंकां कर्तुं न शक्यत इ
त्याह जनपदेति जनपदो देशः भुवनानि इंद्रादिलोकाः आदिशब्देन ब्रह्मांडमुच्यते तद्रूपा
णि स्थानानि तान्येव जैत्रासनानि तेषु तिष्ठन्तीति जैत्रासनस्थाः तेषु जैत्रासनस्थेषु ईश्वरेषु ब्र

जनपदभुवनादिः स्थानजैत्रासनस्थेष्वनुगतनिजवार्तेनश्वरेषीश्वरेषु परिचितनिगमां
तः पश्यति श्रीसहायं जगति गतिमविद्यादंतुरे जंतुरेकः ॥ १६

ह्मादिषु अनुगता अनुवर्तमाना निजवार्ता तत्सत्तिवार्ता यथा भवति तथा नश्वरेषु नाशशी
लेषु सत्सु परिचितनिगमांतः वेदांतपरिश्रमवान् एकजंतुः अविद्यया प्रारब्धकर्मरूपया
दंतुरे निम्नोन्नते जगति श्रीसहायं भगवंतं श्रियःपतिं गतिमुपायं पश्यति अवधारयति
ब्रह्मरुद्रादीनामुत्पत्तिविनाशघटीयंत्रपतितत्वेन उपायत्वाभावात् तदैश्वर्यस्य सुकृत
तारतम्यनिबंधनत्वेन भगवंतमेवोपायत्वेन निश्चिनोतीति भावः ॥ १६ ॥ श्रीरामजी ॥

कृष्णः ८

पूर्वश्लोकोक्ततत्वत्रयमध्येपठितःईश्वरःकोवेत्याशंक्याश्रियःपतिरेववेदांतैरीश्वरत्वेनप्रतिपा
द्यतइत्याहपरदेवतापारमार्थ्याधिकारःआत्मैक्यमितिआत्मैक्यंएकजीववादःदेवतैक्यंइं
द्रादिसर्वदेवतैक्यवादःत्रिकात्ब्रह्मादिदेवतात्रयात्समधिकःअतिरिक्तःतस्यभावस्ता
त्रितत्त्वीर्णब्रह्मवादःतुल्यतासर्वदेवतासाम्यवादःत्रयाणांब्रह्मविष्णुरुद्राणांऐक्यंअभेद
वादःअन्यत्रविष्णुव्यतिरिक्तेषुऐश्वर्यपारम्यंदेवतांतरपारम्यवादःइत्यादिशब्देनशून्यवादादे
र्ग्रहणंअनिपुणानामज्ञानिनांफणितीःशास्त्राणिसंतःदेवतापारमार्थ्यवेदिनःनाद्रियंतेनगणय

आत्मैक्यंदेवतैक्यंत्रिकसमधिकतातुल्यतैक्यंत्रयाणामन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियं
तेनसंतःत्रैय्यंतैरेककंठैस्तदनुगुणमनुव्यासमुखोक्तिभिश्चश्रीमन्नारायणोनःपतिरखि
लतनुर्मुक्तिदोमुक्तभोग्यः ५

यंतिईश्वरःकोवेत्तिचेत्तत्राहत्रैय्यंतैर्वेदांतैःएककंठैःपरस्परा
विरोधिभिःत्रैयंतैःतदनुगुणाभिःवेदांतानुसारिणीभिःमनुव्यासमुखानामुक्तिभिःस्मृतीति।
हासरूपाभिःप्रमाणाभिश्चश्रीमानितेतदीश्वरनिरूपकंनारायणोनःपतईश्वरःशरीरवाचि
शब्दानांशरीरिणिपर्यंततत्वनियमात्ब्रह्मादिपारम्यप्रतिपादकशब्दानांशरीरिणिनारायणए
वपर्यवसानमाहअखिलतनुरितिनिखिलंचेतनाचेतनशरीरकःमुक्तिदःमोक्षप्रदःमुक्त

अधि०
९

एतादृशोऽनुसंधाता तु विदुर्लभ इत्याह विषमिति धीरः विषयदर्शनेऽपि अविकारी वहिर्विषयात्मकं शब्दस्पर्शादि वाह्यविषयजातं विषमिव वदन् कुर्वन् परिहरन् परिमितरसा परिच्छिन्नानंदा या स्वात्मप्राप्तिः केवलं तद्विषये प्रयासः तत्र पराङ्मुखः आयासो महान् फलं तु परिमितमिति भावः जितदासितास्त्या संसृतिः स्वर्गादैश्वर्यं येन सः तथोक्तः निरवधिः कालपरिच्छेदरहितः आनंदो यस्यां सा च सा ब्रह्मानुभूतिश्च तस्यां कुतूहली पुरुषः जगति देवात् असतमामधेयवशात् कश्चित् भविता ऐश्वर्य केवलं विरक्तिः ब्रह्मप्राप्तिकामना च महात्मनः कस्य चि

विषमिव वदन् कुर्वन् धीरो वहिर्विषयात्मकं परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः
निरवधिमहानंदब्रह्मानुभूतिकुतूहली जगति भविता दैवात् कश्चित् जितदासि
तसंसृतिः ९

त्संभवतीति भावः ९ अथ प्रपत्तेरप्युपायत्वे लघूपायतया सर्वैर्बातत्रैव प्रपत्तौ स्वीकारित्वात् भक्तेरनुष्ठानलक्षणाप्रामाण्यप्रसंग इत्यात्राह अधिकारभेदेनाविरोधदर्शयन् विकल्पो विशिष्टफलत्वादिति सूत्रोक्तं भक्तिप्रपत्त्योस्समविकल्पं दर्शयति अधिकारिविज्ञानाधिकारः मुमुक्षुत्वे इति विद्वांशेषत्वज्ञानवतां मुमुक्षुत्वे मोक्षेछावत्वे तुल्येसत्यपि मधुविद्यादिषु तत्पासनेषु आदिशब्देन दहरादीनां ग्रहणं अधिकृतिविशेषेण तत्तत्कर्मानुरूपाधिकारभेदेन यथा यद्वत् व्यवस्था समविकल्पादिरूपा संसिद्धेत् संभवति तथा तद्वत् न्या

हरिः
९

अथात्मानात्मज्ञानवन्तः संसारोऽस्मद्दोषवाँस्तोत्याद् मुमुक्षुत्वाधिकारः कालावर्तान्निति का
लाः शीतोष्णप्रधानाः त एवावर्ताः यद्वा कालाः ऋतवः इति चोदिताः उपरागादयः तेषामावर्तत्वनि
रूपणं स्वरूपविरोधिबुद्धिजनकत्वेनेति संप्रदायः प्रकृतीः शरीरारंभकचतुर्विंशतितत्त्वानि
विकृतीः तत्कार्यभूतदेवतिर्यगादिशरीराणि कामभंत इति कामाः स्रगादयः तेषामावर्त
त्वनिरूपणं भोगेषु अनुभवेषु दोषान् अल्पास्थिरत्वादीन् ज्वालागर्तेन अग्निज्वालाकले

कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान् ज्वालागर्ते पतितम् दुरितोदर्कदुःखानुभूतिं
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत् काराकल्पं वपुरपि विदन् कस्तितिक्षेत बंधम्
१७

नष्कृतिर्नो येषां तानि चैतानि दुरितानि च तान्युदर्कः उत्तरकालफलं यस्मात्तां दुःखानुभूतिं वर्त
मानदुःखानुभवं तस्मिन् परे भगवति च नियतं स्वाभाविकं याथातथ्यं शेषशेषिभावं दिव्यपदं
च यद् स्थानं सदनात् ऊर्ध्वं तद्धि सोपरमंपदमित्यादि निरुक्तं यत्तत्पदं च काराकल्पं बंदिग्रहतुल्यं
वपुरपि विदन् जानन् को वा बंधं प्रकृतिसंबंधं तितिक्षेत सहेत [illegible] विदन्निति वर्तमान
निर्देशेन बंधनिवृत्त्यर्थं विषयदोषानुसंधानं जीवपरमात्मस्वरूपानुसंधानं परमोपायः प्रप

उ

इदानींप्रपत्तेरुपायत्वमद्वितीयत्वञ्चगरमितिन्यायेनउक्तंसत्यास्थिरीकुर्वन्प्रपन्नद्वैविध्यमुखे
नतयोरनुभवभेदमाह प्रपन्नादितिमुकुन्दः सकलफलप्रदः परमात्माप्रपन्नादन्येषांप्रपन्नव्य
तिरिक्तानांनिजपदं श्रीवैकुण्ठंनदिशतिउपासकस्य अधिकारेसत्यपिप्रपत्तेरर्थवादः प्रपन्नश्च
सुचरितपरिपाकभिदयासुकृतपरिपाकेनभेदेनद्वेधादृप्तार्तरूपेणद्विधाभवतितयोरनुभवभे
दमाह एकस्यदृप्तस्यविलंबेशरीरावसानेतत्प्राप्तिः ब्रह्मप्राप्तिर्भवतिभजनरूपंगुणानुभवा

प्रपन्नादन्येषांनदिशतिमुकुन्दोनिजपदं प्रपन्नश्चद्वेधासुचरितपरिपाकभिदया विलंबेतत्प्रा
प्तिर्भजनसुखमेकस्यविपुलं परस्याशुप्राप्तिः परिमितरसाजीवितदशा ॥ २०

द्विरूपंसुखंविपुलंशरीरावसानपर्यन्तकर्त्तव्यतयाबहुलंपरस्याशुतत्क्षणमेवप्राप्तिः ब्रह्मप्रा
प्तिः जीवितदशातुपरिमितरसातस्य आर्तिप्रचुरतयागुणानुभवादेरवकाशाभावात्परिच्छि
न्नानंदेसर्थः केचित्प्रपन्नशब्देन अंगप्रपत्तिनिष्ठतयाउपासकमपिसंगृह्यस्वतंत्रप्रपत्तिनिष्ठतयाप्रपन्नद्वैविध्यमभिधायउपासकस्यप्रारब्धानुभवावसानेप्राप्तिःसंततभ्यमानब्रह्मध्यान
जनितसुखंतुविपुलंप्रपन्नस्यतुतच्छरीरावसानेप्राप्तिःशीघ्रमेवभवतिसततध्यानसामग्र्य
भावात् जीवितकालः परिच्छिन्नानंदइत्याहुः ॥ २० श्री श्री

नारूपाधिकारभेदेवा किं नियामकमित्याशंक्य भगवत्स्वातंत्र्यमेव नियामकमित्याह नियताइति
यस्यास्वतंत्र्यदेवतस्य भगवतः वैजात्यं विजातस्य भावस्स्वातंत्र्यमिति यावत् एवं नियमयितुं ए
तादृशाकामनाभेदेमुत्पादयितुं प्रभवतिशक्नोति अयंभावः यथासाक्षाद्ब्रह्मप्राप्तिसाधने श्रो
पासने जागरूके सति अवहितब्रह्मप्राप्तिसाधनानां मध्वादीनामनुष्ठानमुत्सन्नंस्यादितिविरो
धं वस्तुत्वादिप्राप्तिपूर्वकब्रह्मप्राप्तिकामनादिरूपेण अधिकारिभेदेन परिहरति तत्कामना

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथाव्यवस्थासंसिद्धेदधिकृतिविशेषेण विदुषां विक
ल्पे तन्मासे स्थितिरितरविद्यासु च तथा नियमाः वैजात्यं नियमयितुमेवं प्रभवति १९

भेदेषु भगवत एव कारणत्वं व्यवस्थाप्य मध्वादीनां बहुविधोपासनानां समानफलत्वेन यथास
मविकल्पो निश्चितः तथा भक्तिप्रपत्त्योरपि शक्त्यशक्त्याधिकारभेदेन ज्ञानाज्ञानाधिकारभेदेन
विलंबसहिष्णुत्वासहिष्णुत्वलक्षणस्वरूपभेदेन भक्तेरननुष्ठानलक्षणप्रामाण्यप्रसंगल
के विरोधे परिहृते शक्त्यधिकारभेदेषु च भगवत एव हेतुत्वे व्यवस्थापिते भक्त्यासह समान
फलत्वात् प्रपत्तेस्समविकल्पो युज्यत इति २० ॥ ॥

अधि०
२१

नतु कर्मज्ञानयोरुपायत्वं प्रपत्तेरंगत्वं पौराणिकैरुच्यते तत्कथं भक्तिप्रपत्त्योरेवापायत्वं निष्कृ
ष्यत इत्याशंक्य पुराणोक्तीनामन्यथासिद्धिं दर्शयति कर्मज्ञानमिति कर्मफलादिसंधिं विना
अनुष्ठीयमानं श्रुतिचोदितं कर्मज्ञानं प्रकृतिविलक्षणप्रत्यगात्मज्ञानं उपासनं यमनियमा
द्यष्टांगसहिता भक्तिः आरण्यव्रजेति नाम आनुकूल्यसंकल्पादिपंचांगोपेता प्रपत्तिः इति
च अनेन प्रकारेण अपवर्गसाधनविधौ मोक्षसाधनत्वे अवस्थितान् शास्त्रप्रतिपादितान्
सद्धारकान् अद्धारकान् सद्धारकत्वं कर्मज्ञानयोः अद्धारकत्वं भक्तेः सद्धारकाद्धारकत्वं प्रपत्ते
कर्मज्ञानमुपासनं च आरण्यव्रजेति च अवस्थितान् सन्मार्गान् अपवर्गसाधनविधौ सद्धारकाद्धा
रकान् एकाकृतियोगसंभृतपृथक्भावानुभावानिमान् सम्यक् वेत्स आरण्यपसारथि
गिरामंते रमंते बुधाः २२ इति निष्कर्षः अतएव एकाकृतियोगेन च संभृतः संपादितः पृ
थक्भाव एव अनुभावो येषां तान् एकाकृतियोगेन कर्मज्ञानभक्तीनां पृथक्भावः आकृति
योगेन प्रपत्तेः पृथक्भावः यमान् सन्मार्गान् सम्यक् वेत्ति स कर्मज्ञानयोरुपायत्वप्रतिपादकानां
नां पुराणवाक्यानामंगत्वेनासमर्थ भक्तेः आत्माधिकारत्वं प्रपत्तेरंगांगित्वविशिष्टत्वं च निष्कृ
स आरण्यपसारथिगिरामंते आरण्यपश्चासौ सारथिश्च श्रीकृष्णः तस्य गिरामंते सर्वधर्मादि
श्लोकविहिते उपदने बुधा रमंते तत्रैवासक्ता भवंतीत्यर्थः २२ ॥ ॥

कृष्णः
२१

21

अथईश्वरएवसिद्धसाधनमित्याहउपायविज्ञानाधिकारः उपायइतिस्वप्राप्तेः ब्रह्मप्राप्तेः सः वात्सल्या
दिप्रपन्नत्वगुणविशिष्टः भगवान् ज्ञानशक्त्याद्युपास्यगुणविशिष्टः सएवउपनिषदधीतः वेदान्तप्रति
पादितः उपायः सिद्धोपायइत्यर्थः तर्हि भक्तिप्रपत्त्योरप्रयोजकत्वंस्यात् इत्यत आह प्रपदननि
दिध्यासनेएवगतीउपायौतस्य सिद्धोपायस्यप्रपत्तेरनुग्राहयत्नके प्रमाणे विदितेएतावंतं

उपायस्यप्राप्तेरुपनिषदधीतस्यभगवान् प्रपत्तेतस्योक्ते प्रपदननिदिध्यासनगती तदारो
हः पुंसस्सुकृतपरिपाकेन महता निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः २१

कालमजायमानः भक्तिप्रपत्त्योरन्वयः कथमिदानींस्यात् तत्राह पुंसः श्रेष्ठेतनसमहतावाङ्म
नसापरिच्छेद्येन सुकृतपरिपाकेन तदारोहः तयोर्भक्तिप्रपत्त्योरन्वयः सुकृतपरिपाके हे
तुरित्याशंक्याह तत्रापि सुकृतपरिपाकेपि अखिलनिर्माणनिपुणः अखिलब्रह्मांड
निर्माणसमर्थः स्वयंभगवानेव निदानंत्वादिकारणमित्यर्थः २१ श्रीरामजी।श्रीः

अधि०
१२

12

अथ प्रपत्तेरसाधारणाधिकारात् निरूपयन् प्रपत्तेश्च विश्वासः प्रधानं गम्यमिति सूचयन् वि
शिष्टमेव प्रसक्त्यभिसाह: भक्त्यादाविति भक्त्यादौ आदिशब्देन कर्मज्ञानयोर्ग्रहणं भक्ते
स्तदंगयोः कर्मज्ञानयोश्च श्रद्धाभावः अनुष्ठानासामर्थ्यं एकोऽधिकारः प्रमितिरहितता
भक्त्यादिगोचरज्ञानाभावः शास्त्रतः पर्युदासः अत्रैवर्णिकत्वं कालक्षेपाक्षमत्वं आ
र्त्तिः नियतिवशात् दैववशात् नामपरा नियतिर्विधिरिति आयतद्भिः आगतैश्चतु

भक्त्यादौ श्रद्धाभावः प्रमितिरहितता शास्त्रतः पर्युदासकालक्षेपाक्षमत्वंर्त्तितिनिय
तिवशादायतद्भिश्चतुर्भिः एकद्वित्र्यादियोगव्यतिभिन्नैर निजाधिक्रियासंश्रयंते सं
तः श्रीशं स्वतंत्रप्रपदनविधिना मुक्तये निर्विशंकाः २४

र्भिः तैरधिकारैः एकयोगेन त्रियोगेन चतुर्योगेन च व्यतिभिन्नाः विभक्ता निजाधिक्रि
याः निजाधिकारा येषां ते संतः मुमुक्षवः निर्विशंकाः संतः अनेन महाविश्वासः सूचि
तः स्वतंत्रप्रपदनविधिनाष्टग्युपायनं तत्प्रपत्त्यनुष्ठानेन मुक्तये मोक्षाय श्रीशं लक्ष्मी
विशिष्टं भगवंतं संश्रयंते प्रपद्यंते शरणं गच्छंतीत्यर्थः २४ श्री श्री

क०षः
१२

अथसर्वेषामुपासनानांसाधारणाधिकारानुज्ञानत्रस्कादीन्निरूपयन् भक्तेस्त्रैवर्णिकान्वयनिरूप
णामुखेनप्रपत्तेः सर्वयोग्यतांदर्शयति प्रपत्तियोगाधिकारः अर्थित्वेनेति अर्थित्वेन विलंबसहि
ष्णुत्वेनचसहसमर्थतात्रिकंतत्रुः समर्थतात्रिकमित्यनेनसार्थ्यंविदुष्यंअपर्युदासश्च विवक्षिताः
अर्थित्वेनसहसमर्थतात्रिकंतत्रुः अधिकारोयस्याभक्तेस्स्यात्तथोक्ता आकुरनियुक्ताश्च अर्थी
समर्थोविद्वान्शास्त्रेणापर्युदस्तइतिसंपिंडितामिलिता अधिक्रिया अधिकारोयस्यास्तथोक्ता
ज्ञानत्रस्कादीनांचतुर्णांमेलनेनसत्येवभक्तावधिकारः नत्वेकैकयोगेनेतिभावः साभक्तिः अ

अर्थित्वेनसमर्थतात्रिकतनुसंपिंडिताधिक्रिया साष्टांगषडंगयोगनियतावस्थाभवस्थापि
ताश्रौतीसर्वशरण्यताभगवतस्स्मृतापिसत्यापितासत्यादिषुवैनेगमेष्वधिकृतिस्सर्वास्पदेसस्पष्टेस्व
ष्टांगेषडंगेर्वायोगेननियतात्रैवर्णिकमात्रनियता अवस्था यस्यास्तथोक्ताभवस्थापिताश्रुता
दिभिरितिशेषः भगवतः सर्वशरण्यतावर्णाश्रमानादरेणसकलप्रपत्तव्यताश्रौतीमुमुक्षुर्वै
शरणमहंप्रपद्ये इत्यादिश्रुतिसिद्धास्मृतापिनजातिभेदंनकुलंनलिंगंनगुणक्रियासर्वएवप्र
पद्येरन्सर्वधातारमुत्तमित्यादिस्मृतिभिश्चसत्यापितापारमार्थीकृता ननुश्रुतिविहितेषुक
र्ममत्रैवर्णिकानामधिकारइत्याशंकांदृष्टांतप्रदर्शनेननिराकरोतिनैगमेष्वसत्संवदेत्यादिनि
गमविहितेषुसत्यादिष्विव आदिशब्देनतटाकनिर्माणादिसंग्रहः सर्वास्पदेसकलान्वययोग्ये

अधि॰ सू॰

इदानीं षडंगप्रपत्तिमयि सूचयन् तेषामंगानां प्रयोजनमाह प्रख्यात इति एष योगः प्रपत्त्याख्य उपायः भगवतः शासनैः पंचरात्रादिभिर्भगवच्छास्त्रैः सत्कं सषांग इति प्रतिपादितः तत्र तेषां अंगानां मध्ये द्वाभ्यां आनुकूल्यसंकल्पप्रातिकूल्यवर्जनाभ्यां अपायात् अकृत्यकरण कृत्याकरणात् अपायात् विरतिः अपायान्निवृत्तिः बोध्या अकृत्यकरणवत् कृत्याकरणस्यापि अपाय

13

प्रख्यातः पंचषांगस्सद्भिरिति भगवच्छासनैरेष योगस्तत्र द्वाभ्यामपायाद्विरतिरपायतैकेन बोध्या एकेन स्वांतदार्ढ्यं निजभरविषयेऽन्येन तत्साधनतेच्छा तत्त्वज्ञानप्रयुक्तात्विह सपरिकरे ता
दधीन्यादिबुद्धिः २६

कोटिनिवेशात् आनुकूल्यसंकल्पेनाप्यपायनिवृत्तिरेव बोध्यते एकेन कार्पण्येन अनितरोपायतानुपायांतरशून्यता बोध्या एकेन महाविश्वासेन स्वांतदार्ढ्यं चित्तस्थैर्यं बोध्यं अन्येन गोप्तृत्ववरणेन निजभरविषये आत्मीयपुरुषार्थविषये तत्साधनतेच्छा सिद्धोपायसाधनतावद्धिः सपरिकरे सांगे परद्रव्यप्रदने तात्तादधीन्यादिबुद्धिः ईश्वराधीनत्वादिबुद्धिः तत्त्वज्ञानप्रयुक्ता तत्त्वज्ञानेन संपादिता शेषत्वज्ञानांगेन सिद्धोपायाधीनत्वबुद्धिर्बोध्येत्यर्थः २६

कृष्णः सू॰

अथ समर्थः कारुणिकः प्रपत्तव्य इति न्यायं सूचयन् यद्यत्साधनं तत्तत्सांगमिति न्यायेन मो
क्षसाधनस्य प्रपदनस्यांगानि दर्शयति परिकरं विना नाधिकारः इत्यादिनेति दयादिव्यांभोधौ
दयायाः दिव्यांभोधौ अप्राकृतसमुद्रे अनेन कारुणिकत्वमुक्तं अखिलं चेतनात्मकं
जगदंतः प्रविश्य यमयति नियमयति अत एव भवस्य संसारस्य ध्वंसेन निवर्त्तनेन द्युक्ते

इत्यादिनेत्थंभूतः सकृद्यमवरूपं भवनवान् दयादिव्यांभोधौ जगदखिलमंतर्यमयति
भवध्वंसोद्युक्ते जगदवति भरन्यासवपुषः प्रपत्तेरादिष्टः परिक[illegible]शेषः श्रुतिमुखैः २५

नुन्मुखे जगदवति त्राणादिगुणसंपन्ने अनेन सामर्थ्यमुक्तं तस्मिन्विषये भरन्यास एव व
पुषः अंगं यस्यास्तस्याः प्रपत्तेः श्रुतिमुखैर्वेदांतैः आदिष्टः इत्यनेन पंचकत्वसंख्या युक्तः
इत्थंभूतः आनुकूल्यसंकल्पादिप्रकारः परिकरविशेषः अंगसमूहः अयं सकृत
न्यासात्पूर्वमेकवारं अवरूपं भवनवान् अवरूपानुष्ठेय इत्यर्थः २५

अधि०
२५

14

उपपन्नस्य कथं स्वप्रयत्ननिवृत्तिरीश्वरो वा कथं प्रयत्नमपेक्षते इत्याशंक्य अत्राह कर्तृत्वादीश्वराधीन
कर्तृत्वाच्च चेतनस्य पुनर्यत्नो न संभवति स्वामी त्वादीश्वरोपि पुनर्यत्नमपेक्षते इति परिहरति यु
गपत्स्यंदनेति युगं वहंतीति युग्याः अश्वाः स्यंदनो रथः सारथिः तत्प्रेरकः तेषां त्र याणां
क्रमः प्रकारस्सोस्यास्तीत्यत्र धृति धारकत्वाच्चेतनस्य युग्यसाम्यं अचितो धार्यत्वेन स्यंदनसाम्य
मुभयप्रेरकत्वेन ईश्वरस्य सारथिसाम्यमिति विवेकः त्रयं तैः भोक्ता भोग्यं प्रेरितारं च मत्वा
जुष्टस्ततस्तेनामृतत्वमिति इत्यादिवेदांते संदर्शिते सम्यक् विविच्य प्रतिपादिते तत्त्वानां

युग्यस्यंदनसारथिक्रमवति त्रयं तत्संदर्शिते तत्त्वानां त्रितये यथार्हं विविधव्यापारसंततानि नि
हेतुत्वं त्रिषु कर्तृभावस्तु अनयोः स्वाधीनत्वे कत्र तत्स्वामी स्वीकृतयत्नोयमवसस्तत्र स्वयंनि
धुरः २५
चिदचिदीश्वराणां त्रितये यथार्हं विविधव्यापारसंततानि निसति यथार्हं तत तत्स्वरूपोचितय
थाभवति तथा विविधानामनेकप्रकाराणां व्यापाराणां संतानस्समयः सोस्यास्तीति संतानि
निसति चिद्व्यापारा धर्माधर्मकामादिपुरुषार्थविषयाः अचितः परिणामित्वादयः ईश्वरस्य
जगन्निर्माणादिविषया इति व्यापारक्रमः तत्र तद्व्यापारविषये त्रिषु चिदचिदीश्वरेषु हेतुत्वं
कर्तृभावः तद्व्यापारकर्तृत्वमनयोर्जीवेश्वरयोः एकत्र ईश्वरे स्वाधीनकर्तृत्वं स्वाधीनहेतुत्वं
च तत्स्वामितयोश्चेतनाचेतनयोः स्वामित्वेन स्वीकृतः अंगीकृतः यत्नस्समोचस्य नरोयेन

अथ सांगप्रपदनमाह सांगप्रपदनाधिकारः संगृह्यते अनीष्टे इति स्वतः स्वनेतरतः इतर
त्वत्स्वरूपादिनिर्वा अनिष्टमोक्षे स्वसाध्ये साधयितव्ये अत्र कोऽस्तीति कचन समर्थे कारुणि
के श्रियः पतौ यां चान्वितं यां च याचे त्वं मे गोपायिता भवेति प्रार्थनात्तं तद्भरन्यासं तस्य अनीष्ट
स्य योऽनरोयत्नः तस्य न्यासमित्यङ्गे पंचप्रपदनमिति वदंति अनन्यसाध्ये स्वानीष्टे महाविश्वा
सपूर्वकं तदेकोपायतायां चाप्रपत्तिः शरणागतिरित्यादिभिः यांचापूर्वक भरन्यासमे

अनीष्टे स्वसाध्ये स्वतः इतरतो वा कचन तत् भरन्यासं याच्ञान्वितमिति वदंते प्रपदनं इ
तः पश्चादसम्भूतननिरपेक्षेण भवता समर्प्योऽसावर्थस्त्विति मिति विशेषनं च विदुः

न्प्रपत्तिं लक्षयन्...समर्प्यः ननु निरवयवस्य यत्नस्य कथं निक्षेपत्वमित्याशंक्यामुत्त
रार्द्धेन परिहरति इदं न्यासात्मकं प्रपदनं मतिविशेषं ज्ञानविशेषं च विदुरिति न किंतु
विदुरेव मतिविशेषं मनीनी प्रदर्शयति इतः पश्चादिति इतः पश्चात्प्रपत्त्यनंतरं अ
सम्भूतनिरपेक्षेण असम्भूयत्ननिरपेक्षेण। भवता त्वया असावर्थः पुरुषा
र्थः समर्प्यः साध्य इत्येतादृशं मतिविशेषं विदुः प्रपत्त्यात्मकास्य व्यापारस्य सापेक्षोऽपि भग
वान्प्रपत्त्यनंतरमस्य व्यापारमनपेक्ष्य पुरुषार्थं साधयेदिति बुद्धिविशेषस्यैव भरन्यासत्व

अधि॰
९५

15

अथऐश्वर्यकैवल्यहेतुभूतस्यकर्मणस्वरूपेणत्यागासंभवसमनंतरंभगवदाज्ञाकैंकर्यमे
वकर्त्तव्यमित्याह भगवतीति पारंपरंपरमपुरुषार्थंगंतुंप्राप्तुंहरौअनिष्टनिवर्त्तकेभ
गवतिइष्टप्रापणोपयोगिज्ञानादिगुणयुक्ते ईश्वरेभरन्यसनंकृतंउपपत्तिः कृतेसर्थःप
रिमितसुखप्राप्त्येपरिमितसुखयोः ऐश्वर्यकैवल्ययोः प्राप्त्यैकृतंकर्तव्यंकर्मअकृ
तवत्फलंजनयत्वेणादिनिषिद्धकर्मवत्प्रहीणंस्वरूपेणसक्तंवपुर्वृत्तिभिःशरीरयात्रा

भगवतिहरौपारंगंतुंभरन्यसनंकृतंपरिमितसुखप्राप्त्यैकृतंप्रहीणमकृतवत् भवति
चवपुर्वृत्तिभिः पूर्वैकृतैर्नियतक्रमैः परमिदंविभोराज्ञासेतुर्बुधैरनुपाल्यते ९०

चपूर्वजन्मांतरेप्रकृतेकर्मभिः नियतः अवर्जनीयः क्रमः सुखदुःखक्रमः यस्याः सात
थोक्ताभवतिशरीरयात्रायाः कर्मनिबंधनत्वात्सुखदुःखक्रमस्यअवर्जनीयत्वंतत
दर्शयन्लोनकर्त्तव्यमितिभावइदंतुपरंतुइदमाज्ञायांविभोस्सर्वस्वतंत्रस्यभगवतः आ१
ज्ञाकैंकर्यसेवसेतुः मर्यादाबुधैः शेषत्वज्ञानवद्भिः परंअवश्यंअनुपाल्यतेभगव
दनुवर्त्तमानार्थमनुष्ठीयतइत्यर्थः ९० ॥ ॥

हृषः
९५

अथ कृतकृत्साधिकारसंपत्त्या ते समर्थे इति समर्थे अनिष्टनिवृत्तिपूर्वके इष्टप्रापणे दक्षे सर्वैः
ज्ञे तदुपयोगिज्ञानवति सहजसुहृदि स्वाभाविकबांधवे परमात्मनि त्वयि कृतभरे स्वयमंगीकृ
तं मोक्षप्रयत्ने सति इह संसारदक्षणयानः अस्माकं शरणागतानां तदर्थं मोक्षार्थं पुनरपि स
कृत्प्रपत्तिव्यतिरेकेन यत्किंचिदपि कर्तव्यं नास्ति सकृत् शरणन्यासानंतरं समस्तभरस्य मो

समर्थे सर्वज्ञे सहजसुहृदि स्वीकृतिभरे तदर्थं कर्तव्यं न पुनरिह यत्किंचिदपि नः नियर
त्वं तस्मिन्निरवधिमहानंदजलधौ कृतार्थीकुर्मः स्वं कृपणमपि कैंकर्यधनिनः ९

तदर्थं कर्तव्यं किमपि नास्तीत्यर्थः अन्यत्किंचित्कर्तव्यमित्याह निरवधेः परिच्छेदरहितस्य
महानंदस्य जलधौ तस्मिन् भगवति नियतं तो समस्तभराः वयं कैंकर्यधनिनः कैंकर्य
रूपद्रव्यवंतः कृपणमपि एतावत्कालं कैंकर्याभावात् दीनमपि स्वं आत्मानं कृतार्थीकु
र्मः आत्मानमित्यनुवर्तते २९ ॥ ॥ ॥

अधि०
२६

१६

अनयानिष्ठयाकालोनेतव्य इत्याह स्वाप इति स्वापोद्बोधयोः निद्राजागरणयोः व्यतिकरः
संपर्कः तत्तुल्येत्रोषत्वज्ञानोदयात्केवलस्वापतुल्यतापिनास्ति प्रकृतिसंबंधात्केवलो
द्बोधतुल्यतापिनास्ति अतस्तदुभयसंपर्कतुल्यता भोगो वर्त्तमानसुखदुःखानुभवः मो
क्षो भाविपुरुषार्थः तयोरंतराले मध्यमकाले अनुपगतव्यतिरिक्तानां सर्वेषां विनाज्ञा
तकेवलं भोगोपि न प्रकृतिसंबंधानुवर्त्तनात् केवलमोक्षोपि न अतस्तदंतरालत्वं जग

स्वापोद्बोधव्यतिकरनिभे भोगमोक्षांतराले कालं कंचिज्जगति विधिना केनचित्स्याप्यमानाः
तत्त्वोपायप्रवृत्तिविषये स्वामिदत्तां स्वनिष्ठां शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयंति
॥२२॥

ति अस्मिन् लोके केनचिद्विधिना अदृष्टत्वात् अज्ञातेन केनचिद्दृष्टेन कंचित्कालं शरीराव
सानपर्यंतकालं स्याप्यमानाः उपपन्नाः तत्त्वं स्वरूपं उपायस्वरूपानुरूपोपायः प्रवृ
त्तिशब्देन पुरुषार्थ उच्यते स्वरूपोपायपुरुषार्थविषये स्वामिना दत्तां शेषां कृतकृत्यसाना
मपि कर्त्तव्यतया परिशिष्टां स्वस्वनिष्ठं अध्यवसायं शिरसि कृत्वा कृतिनः विवेकिनः शे
षमायुः आयुश्शेषं नयंति काले क्षेपं कुर्वंतीति ॥२२॥

अथस्वनिष्ठाभिज्ञानाधिकारःसंग्रहातेस्वरूपइतिस्वरूपोपायार्थेषुस्वरूपंभगवच्छेषत्वंउपा
योभगवतिविषयेकृताप्रपत्तिः अर्थोभगवत्कैंकर्यरूपपुरुषार्थः तेषांत्रिष्वपिअवि
तथंसार्थंयथाभवतितथाभिविष्टास्थिरामतिर्यस्यसः तथोक्तः तस्यप्रपन्नस्यअभ्रंशोप
त्वानसंधानाभावेनस्वरूपेउपायांतराश्रवेणेनप्रयत्नोप्रयोजनांतरश्रवणाभावेनपुरु

स्वरूपोपायार्थेषुविततथाभिविष्टस्थिरमतेस्वनिष्ठाभिज्ञानंसुभगमपवर्गोऽपनतात् अपि
श्रायस्यादौप्रभवतिविनीतःस्थगयितुंगभीरान्दुष्पूरान्गगनमहतःछिद्रनिवहान् ३१

पार्थेचस्थिरबुद्धेःप्रपन्नस्यस्वनिष्ठाभिज्ञानंस्वस्यनिष्ठानुगुणानुभवकैंकर्यादिरूपवृत्तिः
सैवाभिज्ञानंप्रपन्नचिह्नंउपनतात्हस्तागतात् अपवर्गात्मोक्षात्सुभगंमनोहरंकु
तोऽस्माच्छंकाहेतुमाह आदौसमाश्रयणकालेविनीतःगुरुणाशिक्षितःप्रपन्नःय
स्यस्वनिष्ठाभिज्ञानस्यप्रथिम्नाविभवेनगभीरान्अगाधान्अतएवदुष्पूरान्केनापिपूर
यितुमशक्यान्गगनमहतःआकाशवद्विस्तृतान्छिद्राणांपुत्रैषणादीनांनिवहान्
स्थगयितुंनिराकर्तुंप्रभवतिसमर्थोभवति ३१ ॥ ॥

अधि०
५

17

उपपन्नो मंत्रार्थानुसंधानजनितसुखेनैव कालं नयतीत्याह प्रणयिनमिति मुक्ताराम्रुक्तमुक्तः
संस्कृते मणिमये दर्पणे पश्चात्स्वात्मं स्वसमन्वितं समवेतं प्रणयिनं प्रियं दृष्ट्वा प्रियेव मुक्ता
मृष्टे मुक्तमुक्तालोचिते महति अर्थपंचकप्रतिपादके मनोमूलमंत्रे पश्चात्स्वात्मसंधाने
नन्नोषते कस्मै तेन्नाते सतितस्तुतिसंबंधिप्रोषितया पश्चाज्जायमानमिवेत्यर्थः उपभुंक्ते यः
पतिं दृष्ट्वा उपपदनधनाः उपपत्तिमात्रधनाः यथा दरिद्रः धनं प्राप्य तत्संरक्षणमेव करोति।

प्रणयिनमिव स्वात्मं पश्चात्प्रियास्वसमन्वितं महति मुक्ताराम्रष्टे दृष्ट्वा मनोमणिदर्पणे उप
दनधनाः संतः शुद्धैः उपभुंपरिभुंजने प्रसमरमहामोदस्मेरप्रसूनसमैः क्रमैः ॥४

तथा अनादिकर्मवासनया पुरुषार्थबहिष्कृताः जीवाः पुरुषार्थसंपादिनीं उपपत्तिमुपलभ्य
तन्निष्ठामेव परिपालयंतीति ध्वनिः संतः मुमुक्षवः शुद्धैः उपायापायगंधरहितैः प्रसमरेण व्याप्तः
महामोदः लोकातिशायि सौरभ्यं येषां ते च ते स्मेराः विकासिनश्च ते प्रसूनाः कुसुमानि तत्समैः
तद्वद्योग्यतमैः गुणानुभवकैंकर्यरूपैः क्रमैः परिभुंजते अनुभवंतीति यथा नायिका दर्प
णे आत्मानं प्रियं च युगपदवलोक्य पश्चाल्लोगोपकरणैः कुसुमादिभिः प्रियमनुभवति त
था उपपन्नोपि मूलमंत्रे आत्मानं शेषिणं चानुसंधाय तद्गुणानुभवकैंकर्यादिकमनुभवती
ति भावः ॥४

ह्रस्यः
५

अथ उत्तरकृत्याधिकारे संगृह्णाते संतोषार्थमिति प्रपन्नं सद्भिः परमैकांतिभिः सह अ-
ध्यात्मविद्यां जीवात्मपरमात्मयाथात्म्यप्रतिपादकविद्यां संतोषार्थं जीवात्मपरमात्म-
स्वरूपानुसंधानार्थं मुहुः विमृशंति व्याहृतानि परहिंसोपयोगित्वेन यागादि व्याहृतानि
सुव्याहृतानि ज्योतिष्टोमादिप्रतिपादकानि स्वादुसुव्याहृतानि मोक्षसाधनप्रतिपादकानि

संतोषार्थं विमृशंति मुहुः सद्भिः अध्यात्मविद्यां निसंगृह्णाते निशामयंति च स्वादुसुव्याहृतानि अं-
गीकुर्वन्ननघललितां वृत्तिमादेहपाताद्दृष्टादृष्टस्वपरविगमे दत्तदृष्टिः प्रपन्नः ॥२२॥

तामेव विशिष्येभ्यो निसंगृह्णाते स्वयमाचार्येभ्यो निशामयति निशामयति निशामयतीति स्वा-
र्थेणि च अनघां अपायरहितां ललितां ललितां प्ररूपार्थवशोगंपां वृत्तिं प्रपत्युत्तरकाल-
कर्तव्यां आदेहपातात् देहपातपर्यंतं अंगीकुर्वन् आचरन् दृष्टं देहयात्रा अदृष्टमात्म-
यात्रा अनयोर्विषये मोयः स्वपरतरो यत्नः तस्य विगमे परित्यागे दत्तदृष्टिः निहितकटा-
क्षो भवेदिति शेषः ॥२२॥

अधि०
९

18

भागवतः प्रसत्तिमेव पुरुषार्थतमत्वेन प्रार्थयते नाथेइति नाथे भगवति विषयेन ॥ अस्मा-
कं अस्मत् ऐश्वर्यकैवल्यादिकं तृणवदुपेक्षणीयं अस्मदपि वा मोक्षमपि वा तत्तस्य भग-
वतः नाभिः सैव नालिनीसरः तस्मिन्विद्यमानं यन्नालीकं पुंडरीकं तेन स्पृहणीयं सौरभं
सुचं ताति मुचा वा चानया चानया चानया चामहे किंतु प्रसन्नं चितनोज्जीवनतत्परा

नाथेन स्तु एमस्मदस्मदपि वा तन्नाभिनालीकिनीनालीकस्पृहणीयसौरभमुचा वा चान॰
याचामहे प्रसन्नां त्रुलनेमहि स्थिरधियां शुद्धांतसिद्धांतिनां मुक्त्यैश्वर्यादिनप्रमातसमया
सत्तिं प्रसत्तिं मुकुः ॥ २६

णां स्थिरधियां स्थिरबुद्धीनां अतएव शुद्धांतसिद्धांतिनां शुद्धांतः अंतःपुरं लक्ष्मीरिति यावत्
तस्याः सिद्धांतो नियमः स एव पुरुषकारतया चेतनरक्षकत्वं स एषामस्तीति सिद्धांतिनां
भागवतानां मुक्त्यैश्वर्यादिन प्रमातु समयासक्तिं मुक्त्यैश्वर्यप्राप्त्यादिनस्मयः प्रमातसम
यः तस्य आसतिः प्रकारः यस्यास्तां प्रसत्तिं प्रसादमनुग्रहमिति मुकुः प्रतिपदं लभेमहि प्राप्नुया
मः ॥ २६

हृषः
९

अथ पुरुषार्थकाष्ठाधिकारः संगृह्यते स्वतंत्रेति श्रियः कांतो स्वतंत्रस्वामित्वात् अप्रतिहत
नियंतृत्वात् चिदचितौ चेतनाचेतनौ स्वस्य वक्रमतिः ज्ञानीत्वात्मैव मे मतमित्यादिरूपो गीका
रः तस्य पात्रेषु महाभागवतेषु नियतं नियम्येन विनियुक्ते विशेषेण प्रेरयति खलु स्वकैंकर्य
मपि परिसज्यतत्कैंकर्ये नियोजयतीति भावः खल्विति शास्त्रप्रसिद्धिं दर्शयति यथा लो
काम्नायं लोकानां मध्ये यथा कश्चन यजमानः स्वकीयं दासं स्वपुत्रादिपर्यंतं विनियुंक्त इ

स्वतंत्रस्वामित्वात् स्ववक्रमतिपात्रेषु नियतं श्रियः कांतो देवः स खलु विनियुंक्ते चिदचितौ
यथा लोकाम्नायं प्रतिपतिमुखेण हितधियां ततो नः कैंकर्यं तदभिमतपर्यंतमभवत् २४

सेवंरूप आम्नायः तस्मात् मद्भक्तभक्ताश्च पूजनीया विशेषतः इत्यादितानुभावनतिक्रम्य यति
पतिमुखेभ्यो भाष्यकारादिभिः आचार्यैः आहिताधीः शेषत्वज्ञानं येषां तेषां नः अस्माकं
ततः अतः स्वतंत्रस्वामिनियोज्यत्वात् लोकशास्त्रानुसारेण पूर्वाचार्यैरुपदिष्टत्वाच्च
कैंकर्यं किंकरत्वं संतस्य भगवतः अभिमतभागवताः तत्पर्यंतमभवत् आसीत्
२५

अधि० २९

अथापराधपरिहाराधिकारः संगृह्यते स्वच्छेति असौ प्रपन्नः असाराः अनर्थमिश्रतया निस्सा
राः विषयाः शब्दस्पर्शादयः त एव स्रोतांसि प्रवाहाः तेभ्यः प्रसृतैः उत्पन्नैः पंकैः निषिद्धानुष्ठा
नजनितपापैः निजां प्रपत्तिं एव न वेन निवृत्तपापां आत्मीयां तनुं पुनः कलंकयन् शार्ङ्गिणा भ
गवते यद्यपि न संक्षिप्यते न स्वबध्यते तथापि अयं देहन् तु मालिन्यप्रणामायपापनिवृ

25

स्वच्छस्वाङ्गुसदावदातशुभगां देवादयं देहन् तमालिम्पप्रणामा यमाधवदयामंदाकिनी विंद
ति यद्यप्येवमसावसारविषयस्रोतः प्रसृतैः पुनः पंकैरेव कलंकयन् निजतनुं शार्ङ्गेनेसं
क्षिप्यते ॥२९॥

तयेस्वच्छामच्छैश्वर्यप्रदां स्वाङ्गुं अपूर्वैश्वर्यप्रदां सदावदातां भक्तिप्रदां शुभगां आत्मश
क्तिप्रदां माधवदयैवमंदाकिनी तां देवात् प्रतिपदोक्तं पुनः शरणागतिरूपात्स्वाधिकारा
त् गुणप्रायश्चित्तहेतोर्विंदति प्राप्नोति सा प्रायश्चित्तं प्रतिपदोक्तादिकं सिद्धप्रायश्चित्त
स्व भगवतो दयां जनयति पापनिवृत्तिं तु भगवानेव करोतीति भावः ॥२९॥

हं.स.
२९

अथ शास्त्रीयनियमाधिकारः संगृह्यते मुकुंदे इति मुकुंदे स्वजरं निक्षिप्य अत एव मुक्तवत् अनघः विनष्ट
पापः सन् अविदितस्वामिनः ईश्वरस्य हृदयं येन सः तथोक्तः असो उपपन्नः स्वतंत्रस्य आश्रयाः श्रुतिस्मृति
रूपया सिद्धं अवरूपकर्तव्यं किंच परित्यागे अकरणे सद्यः स्वस्य परेषां शिष्यपुत्रादीनां च विविधानां
लोकापवादमुखोल्लाससंगादिरूपेण बहुविधानाम् अनर्थानां जननात् अतः तां अनतिक्रमणीयां शा
स्त्रीयां विधिचोदितां सरणिं कर्मानुष्ठानं अनुसरति नरः न्यासेन विगतपापस्य लोकापवादमुखोल्ला
सभंगपरिहाराय शास्त्रीयं कर्म मोक्षपर्यंतं कर्तव्यमिति भावः ॥ एतदेव विविच्य प्रकाशयति
श्रुतीति श्रुतिस्मृत्याचारैः श्रुतिस्मृतिचोदितकर्मानुष्ठानैः स्वस्य मतिभिः ज्ञानविशेषैः गतिभिः ती

मुकुंदे निक्षिप्य स्वभरम् अनघो मुक्तवद् असौ स्वतंत्राज्ञासिद्धं स्वयम् अविदितस्वामिहृदयः परित्यागे स
द्यः स्वपरविविधानर्थजननात् दलं घामामोक्षात् अनुसरति शास्त्रीयसरणिं ॥ श्रुतिस्मृत्याचारैः
स्वमतिगतिभिः शुद्धमनसां स्वसंकल्पैः धर्मैः कुलचरणदेशादिसमयैः नियोगैः योग्यानां नि
यमयितुरादेशः नियमतो निमित्तस्वप्नाद्यैः अपि निपुणमतम् अन्विच्छ इति बुधः ॥ यथा नाडिगति विशेषैः

स्मुमुनस्कस्थितिभिः शुद्धमनसां निर्मलांतःकरणानां नामधेयं बुधः शोपत्वज्ञानवान् स्वस्य संकल्पैः मानसकर्म
विशेषैः कुलं ब्राह्मणत्वादि चरणो ब्रह्मचरणत्वादिः देशो ऽविदांध्रदेशादिः आदिशब्देन शाखा सूत्रा
देः संग्रहः स एव समयः संकेतो येषां तेधर्मैः कार्यं कर्मविशेषैः योग्यानां वाचकयुक्तिविशेषाणां नियो
गैः नियमनैः निमित्तस्वप्नसर्वेंद्रियोपरमरूपासुषुप्तिः तदाद्यैः रवस्थाविशेषैश्च आदेः नियमयतुः आ
दिमस्य नियंतुः भगवतः आज्ञिमतं तत्तत्कैंकर्यं निपुणमतं तु तदीयकैंकर्यं तदेवान्विच्छ इति विहितकर्मा

अथ स्थानविशेषाधिकारः संगृह्यते यत्रैकाग्र्यमिति भगवतः पादसेवार्चनं तदाराधनम्आ
दिशब्देन भागवतार्चनादिकं विवक्षितं तादृशे कैंकर्ये स्थिते यत्र स्थले एकाग्रं मनः समा
धानं भवति यत्र स्थले एकांते भासनिष्ठायां व्यवस्थिता धीः यस्य तस्य यस्य कस्यापि अ
धिकारिणः लाभो भवति यस्य कस्यापीति वर्णाश्रमणादरोक्तिः रहस्यत्रयार्थानुसंधा

३०

यत्रैकाग्र्यं भवति भगवत्पादसेवार्चनादे यत्रैकांतिभवसितधिया यस्य कस्यापि लाभः वास
स्थानं तदिह कतिनां भाति वैकुंठकल्पं प्रायो देशा मुनिभिरुदिताः प्रायिकौचित्यवंतः ४१

नस्य सर्वाधिकारित्वात् वर्णाश्रमानादरोक्तिः न विरुध्यत इति दृष्टव्यं तद्वासस्थानं कतिनांचिप
न्नानां इह लीलाविभूतौ वैकुंठकल्पं भूई षल्यूनत्वं कालपरिछिन्नत्वादिति भावः भातिप्रकारा
ति मुनिभिरुदिताः वासयोग्यत्वेन विहिताः प्रायोदेशाः अयोध्यादयस्तु प्रायिकौचित्यम
वंतः प्रायिकं प्रचुरं औचित्यं वासयोग्यत्वं तद्वंतः मुनिभिस्तु प्राचुर्येण तेषां वासयोग्यत्व
मस्तीत्युक्तं न तु तत्रैव वस्तव्यमिति नियमः कृत इति भावः ४२

अथ उपतिनाश्यान्यनुभवनाश्यानि प्रायश्चित्तनाश्यानि चेति विविधप्रकाराण्यायति प्रारब्धे
ति प्रारब्धेतरं अप्रारब्धं ताहशं पूर्वपापं जन्मांतरानुष्ठितपापं अखिलं अप्रारब्धमेव ताह
शं पुण्यपापं ग्रामादिकं अबुद्धिपूर्वकं उत्तरं उपसुत्तरकालकृतं पुण्यपापजातं न्यासेन उपस
क्षपयन् विनाशयन् प्रारब्धेष्वपि पुण्यपापेषु अननुपगतप्रारब्धखंडं च न्यासेन क्षपयन्
धीपूर्वाणां बुद्धिपूर्वाणां उत्तरपाप्मनां उपसुत्तरकालकरिष्यमाणपापानां उपलक्षणमे

प्रारब्धेतरपूर्वपापमखिलं ग्रामादिकं चोत्तरं न्यासेन क्षपयन् अननुपगतप्रारब्धखंडं च नःधी
पूर्वोत्तरपाप्मनामजननात् जातेपि तन्निष्कृतेः कौटिल्ये सति त्रिश्रयाप्यनघयन् क्रोडीकरोति

प्रतुः ४०

तत्पुण्यानां चेत्यर्थः अजननात् अनुत्पत्तेः जातेपि पुण्यपापजनने पि तन्निष्कृतेः तत्प्रायश्चि
त्तेन प्रतिपदोक्तिः पुनः शरणागतिरूपेण क्षपयन् कौटिल्ये सति कुटिलबुध्या प्रायश्चित्ता
करणे निश्चित्या तत्फलानुभवरूपेण दंडेन घयन् निष्पापं कुर्वन् क्रोडीकरोति मुक्तेषु मे
लयति अप्रारब्धानि अननुपगतप्रारब्धानि ग्रामादिकोत्तरपापानि च न्यासनाश्यानि
अनुपगतप्रारब्धानि अनुभवनाश्यानि बुद्धिपूर्वकोत्तराणि प्रायश्चित्तनाश्यानि कुटिल

स्यादनुभवनाश्यानि चेति प्रमाणस्थितिः ४०

अधि॰
२

21

मुक्तस्यातिमकाले शताधिकानाडीप्रवेशं दर्शयन् दहरकुहरे क्षपयातिमतो माद् दहरकुहरे इति देवः
सर्वेश्वरः देवशब्देन स्वयंप्रकाशत्ववाचिनां दहरकुहरवासप्रयुक्तदोषप्रसनीकत्वं व्यज्यते नि
षद्वरदीर्घिकानिषद्वरस्तु जवाल इत्युक्तेः कर्दमं दीर्घिकायां निपतितस्य निजस्य आत्माय
स अपत्यस्य पुत्रस्य आदित्सया उद्धरणे इच्छया अवतीर्णस्य पंके प्रविष्टस्य पितुः क्रमात्प्राया
वद्दहरकुहरे दहरकूपे हृदयकूपे तिष्ठन् स एव प्रभुः सर्वशक्तिः तस्मिन्काले चेतनो क्रम
एकालेऽ इन्द्रशरीरे विद्यमानान्तः अस्माम् अकृतकपुरं अप्राकृतः स्थानं इतिस्थानार्थे
दहरकुहरे देवस्तिष्ठन्निषद्वरदीर्घिकानिपतितनिजापत्यादित्सावतीर्णपितृक्रमात्
तद्धमनिनिमद्दनस्तस्मिन्काले स एव शताधिकामकृतकपुरप्रस्थानार्थं प्रवेशयति
प्रभुः ४४ ज्वलनदिवसज्योत्स्नापक्षोत्तरायणवत्सरान् पवनतपनशालेयांश्च रू
क्रमादचिरद्युतिं जलधरपतिं देवाधीशं प्रजापतिमागतस्तरति विरजां हरेर्वा चस्ततः
परमद्भुतं ४५ शताधिकां धमनिं प्रवेशयति मुक्तस्य शताधिकनाड्या निष्क्रमणमिति वै
दिकसंप्रदायः ४४ अथ गत्यधिकारः संगृह्णाति ज्वलनेति ज्वलनाधिष्ठानदेवतां दिवसं अ
ह्नोऽधिष्ठानदेवतां ज्योत्स्नापक्षं शुक्लपक्षाधिष्ठानदेवतां उत्तरायणं उत्तरायणाधिष्ठानदेवतां व
त्सरं संवत्सराधिष्ठानदेवतां पवनशालेयांश्च रूपवायुस्सूर्यं चंद्रं पवनवायुस्सूर्यं चंद्राधिष्ठानपुरुषान्
क्रमात्पर्यायेण अचिरद्युतिं तडिद्देवतां जलधरपतिं वरुणं जलचरमिति वा पाठः देवाधीशं
इन्द्रं प्रजापतिं ब्रह्माणं आगतः प्राप्तः तेमः प्रजापामरस्सर्थे विरजां तरति ततः परं विरजातरणं

नेतरं वाचो हरेर्वर्त्तमानमिति शेषः वागपरिच्छेद्यं अद्भुतं माश्च
र्यं न तानि संविभूतिं प्राप्नोतीति शेषः ४५

उत्क्रमर्थे विद्रणोति साकाञ्चीति या पुरी वैकुंठस्य कथा सैव सुधा तस्याः रसः तज्जुजां तद्गुणं स्वादर
सिकानां चेतसि नो रोचेत सा पुरी काञ्चीति हेतोः न चाकञ्चीति न प्रकाशते त्रुवीति यदस्य स
र्वेश्वाप्यनघंगः त्रुविसा पुरी अयोध्येति हेतोर्न ध्यास्यते सा पुरी अवंतीति हेतोः कल्मषान्नावति
नरस्तति सा पुरी कांचीति हेतोः नोदंचति न प्रकाशते सा पुरी मधुरेति हेतोः अग्निमाधुर्यं गुणस्य
लेशप्राधान्यं न धत्ते अस्यापि पुरी जया वता निमानं विना नमास्या नागवता निमाना भावे गुणः
स्य लाम्यपि न योग्यानि नागवतानिमाने सति गुणस्य लवत अस्यानि स्थलान्यपि योग्यानीति
साकाञ्चीति न चाकञ्चीति त्रुविसायोध्येति न ध्यास्यते सावंतीति न कल्मषादवति सा कां
चीति नोदंचति धत्ते सा मधुरेति नाग्निमधुरं नान्यापि मान्या पुरी या वैकुंठकथा सुधारसजु
जां रोचेत नो चेतसि ४१ मनसि करणग्रामं प्राणे मनः पुरुषे च तं झटिति घटयन् गत्ते
श्वेतं परे च तमात्मनि स्वविदविद्रुपो रित्यं साधारणेन रणेर्मुखेन पतिपरत्तोनाडीमेदे ये
यो चितमीश्वरः ४२ भावः ४१ अथ निर्वाणाधिकारः संगृह्यते मनसीति ईश्वरः सर्वनियंता
नारीरोत्क्रमणदशायां करणानां ज्ञानाकर्मेन्द्रियाणां ग्रामं समूहं मनसि घटयन् मनश्च प्राणे घ
टयन् तं च प्राणं पुरुषे घटयन् एनं आत्मानं पूर्वोक्तप्रकारेण गत्ते शु घटयन् तमेवात्मानं झटिति
परे आत्मनि घटयन् सन् स्वं आत्मानं वेतीति स्वविद् न जानातीत्यविद् तयोर्ज्ञान्यज्ञानिनो श्वसर
णमार्गस्य मुखे साधारणे ऽस्यं तुल्ये सति ततः पश्चात् यथोचितं तत्तत्स्वरूपोचितं यथा भवति तथा न

र्यंचयस्तथासंभोगेकैंकर्य्यास्यसुखानुभवेनिवृत्तिकथयापुनरावृत्तिप्रसंगेनतज्जितस्सक्त
स्सत्वपरमंसाम्यंभजतिखिलदेयप्रत्यनीककल्याणैकतानकत्वप्रयुक्तंभगवत्साम्यंप्राप्नोतीत्य
र्थः ४७ अथतमेवब्रह्मानुभवमाह्रास्ते अविश्रांतेति अविश्रांतानांविश्रांतिरहितानांसंतता
नामितियावत् अह्नांकैंकर्य्यविश्वासानांजातेर्जाताः कलहाः सूक्तानामरुमरुमिकयास
मस्यन्नअह्लाविशेषाः तएवकल्लोलास्तरंगास्तैर्विषमाः नानाविधाः सुनिभिः उपासकैःसिद्धैर्मु
क्तैः आदिशब्दात् नित्यैश्चसुलभाः वकुविधाश्छत्रचामरादिपरिचर्य्यारूपेणबहुप्रकाराःम

अविश्रांतश्रद्धाजातकलहकल्लोलविषमाममाविर्भूयासुर्मनसिमुनिसिद्धादिसुलभाः मधुः
क्षीरम्यायस्वगुणविभवासंजनकनम्महानंदब्रह्मानुभवपरिवाहाबहुविधाः ४८

धुक्षीरयोर्न्यायोयेषांतेचतेस्वगुणाश्चस्वगुणानांवन्देनशेषशेषिणोर्गुणाश्चंतेऽभवसम
धुक्षीरोपमाभोग्यतमत्वनिबंधनास्वगुणानांविभवः प्रभावः तस्यआसंजनंअनुभवः
तेनजनन्तप्रकाशमानः महानंदोयेषांतेचतेब्रह्मानुभवाः तएवपरिवाहाः प्रवाहाः ममम
नसिआविर्भूयासुः सूक्तैः परस्परस्पर्द्धयासंपाद्यमानानित्ससूक्तसुलभाः छत्रचामरपादु
कारोपणादिरूपेणबहुविधामधुक्षीरवत्भोग्यतमाः शेषशेषिगुणानुभवपूर्वकपरब्र

अथलोकांतरमार्गंसूचयन्तन्निवर्त्यकेभगवतिउपकारमनुसंधत्तेपितृ इति पितृपथः पितृदेव
तालोकमार्गः सएवघटीयंत्रंतस्मिन्नारोहावरोहरूपैः परिभ्रमैः संचारैः निरंतरैः संतन्यमानैः नि
रयपदव्यांनरकमार्गेयानियातानिततोजातैः क्रमैः परिभ्रमैः अधिगताः परिश्रांतिः परिश्रामोयेषां
तान्नः अस्मान् आत्माधरैः ज्वलनदिवसादिभिः अतिवाह्यमानयित्वाहरिरेवचंदनः अनेनसक
लतापहरत्वंसूच्यतेनिजच्छायादायीसन्सुखयतिआनंदयति ५६ अथपरिपूर्णब्रह्मानुभ
वाधिकारः संगृह्यतेवितमसीतिसचिवेनहार्दपुरुषेणगमितः नीतः वितमसिरजस्तमोगुणशू

पितृपथघटीयंत्रारोहावरोहपरिभ्रमैः निरयपदवीयातायातक्रमैश्च निरंतरैः अधिगतपरि
श्रांतानात्माधरैरतिवाह्यनः सुखयतिनिजच्छायादायीस्वयंहरिचंदनः ५६ वितमसिपदेलक्ष्मी
कांतंविचित्रविभूतिकंसचिवगमितः संपद्याविर्भवत्सहजाकृतिः स्फुटतदपृथक्सिद्धिः
सिध्यद्गुणाष्टकस्वत्कलोभजतिपरमंसाम्यंभोगेनिवृत्तिकथोज्झितः ५७ श्रीरामः

भेपदेपरमपदेविचित्रविभूतिकंदिव्यायुधदिव्यभूषणाद्युत्तेकविभूतिविशिष्टंलक्ष्मीकांतंसं
पद्यआविर्भवत्सः अभिव्यक्ताः सहजास्वाभाविकाः आकृतयः ज्ञानानंदादयः यस्यसः तथो
क्तः सन्स्फुटा अभिव्यक्तातेनभगवतासहअपृथक्सिद्धिः यत्रजीवस्तत्रेश्वरइत्यविनाभावो
यस्यताहृशः सन् सिध्यत्प्राप्तंगुणानामपहतपाप्मत्वविशोकत्वविजरत्वविजिघत्सत्वापिपासि
तत्वसत्यकामत्वसत्यसंकल्पत्वनित्यानंदानां अष्टकंसत्स्वरूपानुरूपफलंकैंकः ५७

तत्क्रमेवार्थं ग्रंथांतरेणाह विश्राम्यद्भिरिति उपर्युपरि तरसैतरं भोगेषु विश्राम्यद्भिः अनवरत
भोगरक्षापरवशैरित्यर्थः अत एव दिवानक्तं अहोरात्रं बहिर्दृष्टिभिः बाह्यविषयासक्तबु-
द्धिभिः अस्मद्देशिकानां नाथयामुनयतिवरादीनां संप्रदायेन रहितैः तत्संप्रदायानभि-
ज्ञैरित्यर्थः अद्यापि कवीरतरङ्गैः स्वानुभवदशायामपि अनालक्षितः सिद्धोपायत्वे।

विश्राम्यद्भिरुपर्युपर्युपरि दिवानक्तं बहिर्दृष्टिभिरस्मद्देशिकसंप्रदायरहितैरद्यापि नालक्षि-
तः स्वशास्त्रैः स्वयमेव साधनतया योद्घुष्यमाणः श्रुतौ सत्त्वस्थेषु भजेत सन्निधिमसौ शान्ता-
वधिर्नोवधिः ५०

न अज्ञातः स्वशास्त्रैः पुरुषार्थस्य स्वयमेव साधनतया सिद्धसाधनतया श्रुतौ वेदांतेषु उ-
द्घुष्यमाणः पुनः पुनः प्रतिपाद्यमानः शांतः निवृत्तः अवधिः देशकालवस्तुपरिच्छे-
दो यस्य सः नोवधिः आश्रितानां निक्षेपः असौ भगवान् सत्त्वस्थेषु सात्त्विकेषु संनिधिं
सिद्धोपायत्वेन सन्निधानं भजेत प्राप्नोतु ५० ॥ ॥

इत्यर्थानुशासनपरिच्छेदः प्रथमसमाप्तः अथ सिद्धोपायशोधनाधिकारः संगृह्यते युगपदिति
अखिलं सकलं जगत् अखिलं निःशेषं यथा भवति तथा युगपत् स्वतः प्रत्यक्षेण अजस्रप्रत्य
क्षेण विदन् जानन् अनेन सिद्धोपायस्वरूपं सर्वज्ञतारव्य धर्मेण शोधितं योगिनां सर्वज्ञत्वे सत्यपि
तत्प्रत्यक्षस्य योगाभ्यासजन्यत्वेन तद्व्युदासः विदन्निति वर्त्तमाननिर्देशेन भगवज्ज्ञानस्य प्रत्यक्ष
रूपस्य नित्यत्वं फलितं निरवधेर्दयायाः उदन्वान् अनेन कारुण्यपकर्ता मुक्तं शोकाद्विवर्जि
तः अनेन सामर्थ्यमुक्तं जलधिसुतया सार्द्धं लक्ष्म्या सह जगत् परिपालयन् लक्ष्म्या सह हृषीके

युगपदखिलं प्रत्यक्षेण स्वतः सततं विदन् निरवधिदयादिम्बोदन्वान् शोकाद्विवर्जितः
जलधिसुतया सार्द्धं देवो जगत् परिपालयन् परमपुरुषः सिद्धोपायः प्रदिष्टो नरः सतां ४६

शइत्यादि अर्थोनुसंधेयः परमपुरुष इत्यनेन ब्रह्मरुद्रादिव्यावृत्तिः देवः स्वयंप्रकाशः अने
न जडादिव्यावृत्तिः [illegible] एवंविधईश्वरः स्वीकृतभरः सन् सतां प्रपन्नानां
उपासकानां च जलधिसुतया सार्द्धं सिद्धोपायो भवति अनेन लक्ष्मीविशिष्टस्यैवोपायत्व
मिति शिक्षितं जलधिसुतापदस्य पालयन्नित्यनेन सिद्धोपाय इत्यनेन चान्वयः सर्वज्ञः
कारुणिको जगद्रक्षकः लक्ष्मीविशिष्टश्च सिद्धोपाय इति निष्कर्षः ४६

अधि०
२४

अथचेतनानुष्ठीयमानंसाध्योपायत्वेनसिद्धसाधनवशीकरणसाधनमित्येतत्सर्वसंमत
मित्याह तत्तद्धेतुकेतितत्तद्धेतुकानांतत्तद्वादिनांहेतुकेकुयुक्तिजालेकृतधियःव्यासक्तबु
द्धयः तर्काःकुतर्काःप्रपत्तेःफलानुरूपलाभावादनुपायत्वमित्यादयः तएवइंद्रजालानि
तेषांक्रमैःप्रयोगः कथकानांवादिनांमध्येप्रधानभूतानांगणनेसंख्यायांकनिष्ठांगुला
श्रयांनिष्ठांविभ्राणाः अग्रगण्याइत्यर्थः अतएवअध्यात्मश्रुतयःमुमुक्षुवैभारणम

24

तत्तद्धेतुकहेतुकेकृतधियस्तर्केंद्रजालक्रमैर्दिभ्राणाः कथकप्रधानगणनेनिष्ठांकनि
ष्ठाश्रयां अध्यात्मश्रुतिसंप्रदायकतकेरस्माविशुद्धात्मायाः सिद्धोपायवशीक्रियामिति
हिनःसाध्यांसमध्यापयन् ५२

हंप्रपद्येइत्यादयः प्रपत्त्युपायत्वप्रबोधकाः संप्रदायः पूर्वाचार्यानुष्ठानंतएवकतकानि
कतकंनामपंकिलजलस्यनिष्पंकापादकोवीजविशेषःतैर्विशुद्धात्मायाःनिर्मलांतः
करणाःसंतःसाध्यांभक्तिंप्रपत्तिंचअस्मासाक्षात्सिद्धोपायस्यभगवतःवशीक्रियां
वशीकरणसाधनमितिहिइतिखलुनःअस्मान्समध्यापयन्सम्यक्वोधयामसुःअ
त्रहसनेनभक्तिद्वारःकर्मज्ञानयोरनुवादः ५२ ॥ ॥

कृष्णः
२४

अथसाध्योपायशोधनाधिकारः संगृह्यते यथाधिकारणमितिः प्रभुः सर्वेश्वरः श्रियःपतिः
यजनानि ज्योतिष्टोमादियागादयः दानं शास्त्रविहितसत्पात्रेत्यागः होमस्तु सायंप्रातरग्नि
कार्यादिकं काम्यं अर्चना काम्या भगवत्पूजा भरन्यसनं प्रपत्तिर्भावना उपासनं प्रभृतिशब्दे
देन श्रुतिस्मृतिविहितानि कर्मान्तराण्युच्यन्ते एतैः कर्मविशेषैः सम्यगाराधितः सम्य
ग्वशीकृतः सन् यथाधिकरणं तत्तत्फलकामनारूपाधिकारमनतिक्रम्य देहिनां आरा

यथाधिकरणं प्रभुर्यजनदानहोमार्चनाभरन्यसनभावनाप्रभृतिभिः समाराधितः फ
लं ददातीति देहिनामिति हि संप्रदायस्थितिः श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराम्नातिभिः
५

धकानां अर्थकामादिफलं ददातीति हि अनेन प्रकारेण खलु संप्रदायस्थितिः पूर्वैराचार्यैः
सुनिश्चितो मार्गः यत्फलमुद्दिश्य यत्कर्मानुष्ठीयते तेन कर्मणा वशीकृतो भगवान् तत्फलं
ददातीति संप्रदायः इति एवंरूपा संप्रदायस्थितिः नयवतीभिः युक्तिमतीभिः श्रुतिभिः स्मृ
तिभिः आचार्योक्तिभिश्च नः अस्माकं आम्नाति ग्राह्यतरत्वेन प्रकाश्यतइत्यर्थः ५२

अथ तत्तद्वर्णाश्रमव्यवस्थामाह चातुर्वर्ण्येति चतुर्वर्णानां ब्राह्मणादीनां समाहारश्चातुर्वर्ण्यं
चतुर्विधश्चाश्रमाः ब्रह्मचारिगृहस्थाश्रमाः सुखशब्देन देशकालादीनां ग्रहणं तथाविधे भेदे त
थातेन प्रकारेण अवस्थिते शास्त्रेणैव व्यवस्थापिते सति स्वस्वरूपगुणानुगुण्या सत्वरजस्तमोगु
णानुगुण्या या वृत्तिः सा अनुष्ठानेन विशिष्टं तन्नियतं तत्तद्वर्णाश्रमनियतं कृत्स्नं कर्म श्रिताः संतु
संश्रिताः भवंतु त्यागः वर्णाश्रमनियतकर्मत्यागः स एव तत्पल्लवः तस्य निःसहरस्याशरण

चातुर्वर्ण्ये चतुर्विधाश्रमसुखे भेदे यथावस्थिते कृत्स्नं तन्नियतं गुणानुगुण्या वृत्त्या विशिष्टं
श्रिताः त्यागोपल्लवनिःसहरस्यशरणव्रज्याविधौ कोविदाश्चिंतामस्मुपगंतुमंतिमयुगेप्येकांति
नः संति नः ५४

वृत्त्यापत्तिः तस्याः विधौ अनुष्ठाने तत्र कोविदाः समर्था एकांतिनः अधिगताध्यात्मतत्त्वा
यः अंतिमयुगे कलियुगेपि नः अस्माकं चिंतां स्वबुद्धित्यागकस्याधिकारिण इति चिंतावि
चारं अस्मुपगंतुं अंगीकर्तुं संति वर्तते यद्यपि फलकामनया कर्मकर्तारो बहवः संति
तेषां स्वरूपत्यागः संपादित एव भवति प्रपन्नास्तु बुद्धिमात्रत्यागेन कर्म कुर्वंतः संस
यन्निराकरिष्यतीति भावः ५५ श्री श्री

अथ प्रभावव्यवस्थाधिकारः संगृह्य तत्स्वरूपमिति विष्णोः सर्वेश्वरस्य स्वरूपं यत् यादृक्
गुणानां वात्सल्यादीनां विभवः प्रभावः श्रीलं महतो मंदैसह निरंधुणसंश्लेष तदादिगुण
जातं च यादृक् तत्तस्य भवतः आज्ञाविधिनिषेधरूपा सैव सेतुः स च यादृक् तदखिलं
तत्सर्वं स्वरूपगुणवैभवादिकं श्रुतिभिः वेदांतैः अवसेयं व्यवस्थापितं तथा ईश्वरस्वरू
पादिवत् तद्भक्तानां अनंतगरुडविष्वक्सेनादीनां तदुपसदनादेः तस्य भगवतउपसद

स्वरूपं यद्यादृक् गुणविभवश्रीत्वादि च विष्णोस्तदाज्ञा सेतुश्च श्रुतिभिरवसेयं तदखिलं तथा त
द्भक्तानां तदुपसदनादेश्च महिमा यथाधीतं सद्भिर्यतिपतिमुखैरध्यवसितः १३ श्रीरामः

नं तपासनं आदिशब्देन तत्भक्तायासनमुच्यते तस्य च महिमा प्रभावः सद्भिः सकलप्रभा
वज्ञैः भगवत् भागवमाहिप्रभावज्ञैरितियावत् पतिपतिमुखैराचार्यैर्यथाधीतं गुरूपदिष्ट
मनतिक्रम्य अध्यवसितः व्यवस्थापितः भगवत्भागवततत्तदुपासनं तत्तदुपासनं तः
त्गुणानां महिमा वेदांते एवैश्वर्यव्यवस्थापितः स एव सर्वैरपि अनुसंधेय इति भावः १३

अथ उपसंहरन्नवस्थायां निरूपयति रागद्वेषेति निस्सेनिरूपाधिके रहिते तरिरस्तके भगवति
स्थिते रहितेष्यामीति जागरूके सति कक्षीकृतं संगमनुष्ठितं निजभरमासाभिधानं आ
त्मीयं भरमासाख्यं यत्तपः रागद्वेषमदादिकैः महारक्षोभिः रागद्वेषशब्देन अ
पायोक्तिः आदिशब्देन उपायोक्तिः तैरं रक्षोभिः अक्षोभितं सत् अधर्मदुहमापनि

२८

रागद्वेषमदादिकैरिहमहारक्षोभिरक्षोभितं निस्सेरहितरि स्थिते निजभरमासाभि
धानं तपः यत्कक्षीकृतमस्य सेतु विविधान् धर्मानधर्मदुहस्तद्भमार्णवलेशावर्णेन
मयिशाचां न वाचां पदं ५६

वर्तकान् विविधान् धर्मान् अतिसेत् अतिक्रामति तस्य भासाख्यस्य तपसः भूमाध्रुमा
वस एव अर्णवतस्य लेशः बिंदुः तस्य वर्णनं शाचां उरातनानां वैदिकानामिति याव
त् वाचां पदं परिच्छेद्यं न भवतीति यावत् ५६

अथप्रभावस्याधिकारः संगृह्यते शिलादेरिति शिलाशापप्राप्तशिलारूपा अहल्या आ
दिशब्देन शापात्स्मराशीकृतः पुरुष उच्यते स्त्रीत्वादिः आदिशब्देन पुरुषत्वं विपरिणतिः
परिणामः रामप्रभावेन शिलायाः स्त्रीत्वेन परिणामः कृष्णप्रभावेन स्मराशेः पुंस्त्वेन परि
णाम इत्यर्थः इदमद्भुतमस्तु कदहनस्यैव हिमतेतियत् एतच्च ततोऽपि चित्रं विचित्रं सीतो न वह
नुमत इति सीतावाक्यमाकर्ण्य अग्निश्शीतोऽभूदितियत् उपायाध्यवसायकार्यमिति

शिलादेः स्त्रीत्वादिर्विपरिणतिरस्त्वद्भुतमिदं ततोऽप्येतच्चित्रं यदुत दहनस्यैव हिमता तृणस्य
वास्त्रत्वं रिपुप्रनिहतेरेव हितता पदत्राणेवेदह त्रिभुवनपरित्राणमिति च ५५

यावत् तृणस्यैव काकं प्रति रामप्रयुक्त तृणस्यैव वह्निब्रह्मास्त्रत्वं मन्त्रविश्वासप्रयुक्तमित्यर्थः
रिपुप्रत्युप्रनिहतेरेव मरणस्यैव हितता अतिशयितस्वर्गादिफलसाधनता युद्धादिव
तद्धर्माध्यवसायनिबंधना यदत्रैणेव पादुकयैव त्रिभुवनपरित्राणमिति च त्रिभुव
नसंरक्षणमिति च नर्तसंप्रसोपायाध्यवसायनिबंधन उपायः सर्वोऽपि विश्वासं विना ॥
न फलतीति श्लोकार्थः ५५ ॥

अधि०
२४

27

अनंतरं यद्वर्णसंख्यानिरूपणमुखेन तत्प्रतिपाद्यमर्थमाह इत्थमिति पूर्वोक्तक्रमेण
त्रिभिः पदैः ॐ एवं नमः पदनारायणपदैः संघटितः एकद्विपंचाक्षरैः अष्टाक्षरैः सं
घटितः अध्यात्मसारैः सकलवेदांतसारभूतैः तत्त्वहितप्रयोजनमयैः स्वरूपोपाय
पुरुषार्थरूपैस्त्रिभिः अर्थैश्च संघटितः मंत्रस्य त्रिभिरपि पदैः स्थूलादिवृत्त्या क्रमे
ण स्वरूपोपायपुरुषार्थाः प्रतिपाद्यंत इति संप्रदायः आद्यप्रथमपदभूता अक्ष

इत्थंसंघटितः पदैस्त्रिभिरसावेकद्विपंचाक्षरैरर्थैस्तत्त्वहितप्रयोजनमयैरध्यात्म-
सारैस्त्रिभिः आद्यत्र्यक्षरवेदसूतिरजहत्स्थूलादिवृत्तित्रयस्त्रैगुण्यप्रशमंप्रयच्छ
तिसततांत्रय्यंतसारोमनुः ५८

रा अकार उकार मकाररूपेण वर्णत्रयात्मिका वेदसूतिः वेदसूचितः प्रणवो यस्मिन्
सः अजहत् अत्यक्तं स्थूलादिवृत्तीनांत्रयं यस्य सः आदिशब्देन सूक्ष्ममध्यमवृत्तयोर्ग्र
हणं स्थूला रूढिः सूक्ष्मा योगरूढिः अकारादौ स्थूलवृत्त्या ईश्वरादिस्वरूपबोधनं यो
नरत्वकल्यादीनामिति विवेकः त्रय्यंतसारः असौ मनुः मूलमंत्रः सततां स्वस्मिन् विश्व

हंसः
२४

सवतां त्रैगुण्यप्रशमं प्रशमनं संसारनिवृत्तिं प्रयच्छति प्रकर्षेण ददातीत्यर्थः ५८

अथमूलमंत्राधिकारः संगृह्यते तारमिति आचार्यदत्तं सदाचार्योपदिष्टं पूर्वं मंत्रस्य प्रथ
मपदभूतं तारयतीति तारं संसारोत्तारकं प्रणवं तदनु ततः पश्चात् आचार्योपदिष्टं हृ
दयं मंत्रस्य प्रथमपदभूतं नमः पदं मंत्रस्य हृदयं नमः इत्यभियुक्तः आम्नायोक्तं वेदांत
वेदप्रतिपादितं तन्नारायणायेति पदं च सार्थं मर्थेन सह अवयतामनुसंधधतां अ
लसमनसां मंदबुद्धिनां इदमग्रोक्तैः रण्युपलक्षणं अनेनोपासकापेक्षयाप्रपन्नस्य विल

तारं पूर्वं तदनु हृदयं तच्च नारायणायेत्याम्नायोक्तं पदमवयतां सार्थमाचार्यदत्तं अंगीकु
र्वन्नलसमनसामात्मरक्षाभरन्नः क्षिप्रं देवः क्षिपति निखिलान्निकिंकरैश्वर्यविघ्नान् ५१

क्षणाधिकारः सूचितः नः अस्माकमात्मरक्षाभरमंगीकुर्वन् स्वीकुर्वन् देवः निः
खिलान्निकिंकरैश्वर्यविघ्नान्कैंकर्यात्मुभक्षपार्थप्रतिबंधकदुरितानि क्षिप्रं
शीघ्रं क्षिपति क्षिप्रमित्यनेन निखिलानित्यनेन च विवितफलभाजामनत्युपगतः
प्रारब्धभाजामुपासकानां व्यावृत्तिः ५१ ॥ ॥

अधि०
२९

२८

अथचरमश्लोकाधिकारः संगृह्णाते दुर्विज्ञानैरिति दुर्विज्ञानैः दुःखेनापिज्ञातुमशक्यैः अ
नेनउपासनेज्ञानमधिकारइत्युक्तं सूचितं नियमेननियमाख्येनांगेन इदंतु पमाद्युगांतर
साण्युपलक्षणं एतैरंगैर्गहनै अनुष्ठातुमशक्यैः अननशक्तिरप्यधिकारइतिसूचितं दू
रेविलंबितोविश्रांतिदेशः मोक्षोयेषांतैः विलंबेनमुक्तिप्रदइत्यर्थः अनेनविलंबक्ष
मत्वं अधिकारइतिसूचितं वालानां वालशक्तोपलक्षितस्त्रीशूद्रादीनामनर्हैः अविदितैः
अपर्युदासोप्यधिकारइतिसूचितं वक्रैर्निर्दिष्टहरविद्याद्रिरूपेण वक्रप्रकारैरयनैः

दुर्विज्ञानैर्नियमगहनैर्दूरविश्रांतिदेशैर्वालानर्हैर्वक्रैरयनैः शोचतां नस्सुपंथाः
निष्प्रत्यूहं निजपदमसौनेतुकामः स्वभूम्नाससाथ्यंयं किमपिविदधे सारथिः सर्वनेता इ

उपायैः शोचताः अज्ञानेन अशक्त्या आर्ता अनैवर्णिकत्वेन अस्माकं कथं मुक्तिर्भवि
ष्यतिमत्क्वावधिकाराभावादितिदुःखितान् अस्माकंसुष्ठुपंथाः निरुपाधिकः सिद्धो
पायः निःप्रत्यूहं पुनरावृत्तिशंकारहितं निजपदं स्वपदं नेतुकामः प्रापयितुकामः सर्वने
तासर्वनियंता असौसारथिः श्रीकृष्णः स्वभूम्नास्वस्य अप्रतिहतज्ञानस्वरूपेण प्रभावे
नससाथ्यंयं ससामनमन्त्ररत्नानां पाथ्यंयं किमपि चरमश्लोकाख्यंरहस्यं विदधे कृत
वान् यच्छ निजपदं नेतुकामः असौसारथिः स्वभू ॥ श्रीकृष्णायनमोनमः

कृष्णः
२९

अथ प्रायाधिकारः संगृह्यते आकर्णितः इति यो मंत्रः आम्रेडितः अर्थज्ञानपर्यंतमनुसंहितः
सन् कृतार्थभावं अधिगतः सन् पुरुषार्थत्वं दिशति एषः पद्मासहायस्य श्रीपतेर्विषयेक्रिय
माणया शरणागतिः तदनुष्ठानमंत्रो हृद्यं संसृतिकालरात्रेः संसाररूपमृत्युप्राप्तिनिवृत्ति
याः प्रत्युषतां प्रज्ञातसमयत्वं भजति ५९ अमुमेवार्थमपेक्षितार्थोत्तरनिरूपणमुखेना
ह न वेदांतादिति वेदांतादधिकं कालक्षेपयोग्यं शास्त्रं नास्ति तस्य तिपाद्येषु तत्त्वेषु मधु

आकर्णितो वितनुते क्रतक्रसकस्य आम्रेडितो दिशति यश्च कृतार्थभावं प्रत्युषतां भजति
संसृतिकालरात्रे पद्मासहायशरणागतिमंत्र एषः ५९ न वेदांतात् शास्त्रं न मधुमथनात्
तत्त्वमधिकं न तद्भक्तात्तीर्थं न तदभिमतात्सात्त्विकपदं न सत्त्वादारोग्यं न बुधभजनाद्बोधज
नकं न मुक्तेः सौख्यं न हृदयवचनतः क्षेमकरणं ६० मधुमथनात् केशवात् अधिकतत्त्वं
नास्ति तद्भक्तात् भगवद्भक्तात् अधिकं पवित्रतापादकं तीर्थं नास्ति तदभिमतात् भगव
ताभिमानस्थलादधिकं पदं सत्त्वोद्रेकहेतुस्थलं नास्ति सत्त्वात् शुद्धसत्त्वात् अधिकम् आरो
ग्यं रोगोपशमं नास्ति बुधभजनात् भागवतानुवर्तनात् अधिकं बोधजनकं ज्ञानोत्पा
दकं नास्ति मुक्तेरधिकं सौख्यं नास्ति हृदयवचनतः मंत्रानुसंधानादधिकं क्षेमकराणं
स्वरक्षापादकं नास्ति न वश्यत इति यावत् ६०

अधि०
२१

अथाचार्यस्य साधिकारः संगृह्यते अधिजिगमिषुरिति त्रिधाम्नः सर्वेश्वरस्य दिव्यं अप्राकृतं
आद्यं धाम परमं पदं अधिजिगमिषुः प्राप्तुमिच्छन् आचार्यैः सदाचार्यैः कृताभिः शास्त्रवि
हिताभिः विविधाभिः सद्गुरूपसत्तिसाधुसेवात्वादिरूपेण विविधाभिः परीक्षाभिः शोधिते अ
पिपात्रे पात्रभूते कस्मिंश्चित् सच्छिष्ये कृपापि हितमनेन शोध्यलक्षणदोषं संभजते अनघ

२३

अधिजिगमिषुरद्यं धाम दिव्यं त्रिधाम्नः कृतिविविधपरीक्षाशोधिते अपिपात्रे अनघ-
गुणदक्षिणायामाहितस्नेहमार्यः प्रदिशति निरपायं संप्रदायप्रदीपम् ॥९२॥

स निर्दोषसगुणसदक्षिणायां सुहृद्वदक्षिणायां आहितस्नेहं यथा भवति तथा निरपायं
अन्यथाज्ञानाधिपापरहितं संप्रदायप्रदीपं प्रदिशति कश्चन प्रभुमान् किंकिंकर इह सं
जिगमिषुकुत्र चित् शोधिते पात्रे सस्नेहं हृदि निहितं प्रदीपमारोपयतीति ध्वनिः ॥९२॥

छ०ष:
२१

अथ पूर्वाचार्याः श्रेष्ठाः जानंतीत्याह आसाम्नायः महाभारतस्तदेव पयोधिस्तस्मिन् १
कौस्तुभेन तुल्यं यथा पयोनिधिः कौस्तुभः सारः तद्वन्महाभारतस्य चरमश्लोकः सारइ
त्यर्थः हरेः रत्नमंश्चनपापेक्षितावलंबितफलप्रदोपायविधायकतया उक्तमं हृद्यं मनो
हरं लोकपदव्यां स्वार्थपरित्यागेनापि प्रपन्नं रक्षतीति लोकपदव्यां लोकमार्गेण वेदपद
व्यां तस्मात् धर्मं प्रपन्नं न प्रयच्छंति वेदमार्गेण विश्वासविषयः कृतः अर्थः प्रपत्तिर्यस्मिं

आसाम्नायपयोधिकौस्तुभमणिनिभं हृद्यं हरे रत्नमं श्लोकं केचन लोकवेदपदवीविश्वासिता
र्थं विदुः राधामुक्तिप्रमुक्तिसौधविशिखासोपानपंक्तिप्रमितैवेत्रंपायनसौनकप्रभृत
यः श्रेष्ठाः शिरःकंपिनः ६२

तं श्लोकं चरमश्लोकं केचन महात्मनः विदुः अर्थतो जानंतीति मुक्तिः ब्रह्मप्राप्तिल
क्षणो मोक्षस एव सौधः विशिखा नानाप्रकारं कैंकर्यमिति यावत् तदारोहे सोपान
पंक्तिः प्रवयेषां चरमश्लोकार्थविदुषां उक्तिप्रविषये श्रेष्ठा अतिशयितज्ञानाः अ१
मी वेदव्यासपायनशौनकप्रभृतयः शिरःकंपिनः भवंति शिरःकंपं कुर्वंतीति यावत्
६२

दिरूपं वास्तु गृहं तदादिके वस्तुनि निभृतुरवक्रमतिः अतिशयितविश्वासः गुणवति गुणा-
दोषिश्रेष्वविनियोगं कर्तुं संप्रदायन् गोपयन् रक्षयन् कृतवित् आचार्यकृतोपकारज्ञः
अनघान्निष्पापात् कृत्तिर्व्यापारो यस्य सः किं वा निधानं न विंदेत न प्राप्नोति किं भगवद्भागव-
ताचार्यमुखोल्लासरूपं सर्वं फलं प्राप्नोतीत्यर्थः ६५ अथ शिष्येणाचार्यो देवतात्वेन
पूज्य इत्याह अध्यासीनेति अध्यासीन निसवासिना तुरंगवक्त्रेण विलग्नात्प्रकाश्यमानं

अध्यासीनतुरंगवक्त्रविलसज्जिह्वाग्रसिंहासनादाचार्यादिह देवतां समधिकामन्यां न मन्यामहे यस्यासौ भजते कदाचिदजहत् भूमा स्वयं भूमिकां मग्नानां भविनां भवार्णव
समुत्तारायनारायणः ६६

जिह्वाग्रमेव सिंहासनं यस्य तस्मादाचार्यात् समधिकामन्यां देवतां न मन्यामहे असौ नारायणः स्वयमजहत् भूमा असङ्कुवैभवः सन् मग्नानां अनादिकर्मनिमग्नानां अत एव भविनां संसारिणां भवार्णवात् संसारसमुद्रात् उत्ताराय आचार्यस्य भूमिकां वेषं कदाचित् चेतनसुकृतपरिपाकदशायां भजते अत्र साक्षान्नारायणो देव आचार्यः सद्धरिः साक्षादित्यादि प्रमाणान्यनुसंधेयानि ६६ श्रीरामायनमोनमः

अथाचार्य्यस्य शिक्षां भगवदाज्ञासिद्धत्वाद् निरवधिदयेति निरवधिदया उत्कूलभगवद्
यासैवोदन्वान् तस्य तरंगवत् निरंकुशैः अप्रतिहतैः गुणानामात्मगुणानां शेषत्वपारतंत्र्या
दीनां संक्रमो येषु तैः शिक्षाक्रमैः यः आचार्य्यः शिष्यान् नियमपतिप्रवर्त्तयति अचरम
गुरोर्भगवतः आज्ञापारंपर्य्याः आज्ञारूपश्रुतिस्मृतिसमूहपरवान् परतंत्रः असावाचा

निरवधिदयादिव्योदन्वत्तरंगनिरंकुशैर्नियमयति यः शिष्यान् शिक्षाक्रमैर्गुणसंक्रमैः
अचरमगुरोराज्ञापारंपरीपरवान् सोन पुनरिह तांस्तल्लक्षेण स्वमप्यनिरस्यतिः ६४
अशिथिलगुरुभक्तिस्तत्प्रसादविशीलः प्रचुरबकुमतिस्तद्भक्तवास्त्वादिकैरपि गुण
वतिविनियोक्तुं गोपयन् संप्रदायं कृतविदनघवृत्तिः किंनविंदेन्निधानं ६५

र्य्यः इहलीलाविभूतौ तान् पुनः शिष्यानेवनानिरस्यति किंतु तल्लक्षेण शिष्यशिक्षाव्या
जेन स्वमपि आत्मानमपि अनिरस्यति ६४ अथ शिष्यकृत्याधिकारः संगृह्यते अशि
थिलेति अशिथिलगुरुभक्तिः संततप्रवृद्धः गुरुभक्तिः तत्तस्य गुरोः प्रसादाः आत्म
गुणप्रकाशनं आदिशब्देन तत्कैंकर्य्यमुच्यते तदेव शीलं यस्य सः तत्तस्य आचार्य्यस

अधि०
ग्र०

गृहमंगीकृत्य सन्निरसोहाहः असतां कुटुंबीनां गर्वोपि निर्वापितः तोषात्पुष्पपि परितुष्टे आयु
र्जीवन इति यावत् तोषिणोः उभयविभूतितोषिणोः दंपत्योः श्रीश्रीनिवासयोरदयादी
क्षादयया कृत्तोमोक्षयिष्यामीति संकल्परूपां दीक्षां मुदीक्षामहे क्षेत्रमाणाभवामः ६
८ अथ स्वकीयग्रंथस्य सात्विकेषु तत्प्रयोगं दर्शयति स्तोतुमिति जगदस्मदुक्तिं स्तोतुं
निंदितुं सोढुं नुयेद्दितुं समूढं असमर्थसामर्थ्यरहितं भवति सुस्थे सुस्थिरे केनाप्यप्र

३२

स्तोतुं निंदितुमस्मदुक्तिमथवा सोढुं समूढं जगत्किं तच्छिन्नमनंतचिंतनरसे सुस्थे परं तम्
स्पृषां त्रिषात्रिहितबुद्धयः श्रुतिपथे येषां वयं येच नस्तत्संतोषसमर्पणक्षममिदं सा
डंबरैः किं परैः ६९

कं प्रे अनंतस्य ब्रह्मणः चिंतनं विचारः तदात्मके रसे भोग्यवस्तुनि परं तत्स्पृषां नियमेन तिष्ठ
तां न तावता किं नच्छिन्नं श्रुतिपथे वेदमार्गे त्रिहितबुद्धयः वयं येषां त्रिष्याः येच नस्त्रि
ष्याः इदं मस्मदुक्तं तेषां संतोषसमर्पणे क्षमं न विष्यति साडंबरैः कुतर्कवादिभिः
परैः किं प्रयोजनमिति यावत् ६९ ॐनमो भगवते वासुदेवाय नमो नमः ॥

हलः
ग्र

अथ निगमनाधिकारः संगमय्यतं करवदरेति आचार्यदृष्ट्या आचार्यकटाक्षेण मुषितः
निराकृतः निखिलमोहो यस्य सः करवदरिव करवदरफलवद्विशदीकृतं विश्वं यस्य सः मू
लमंत्रः आदिर्येषां आदिश्चाक्षेनरूयचरमश्लोकयोर्ग्रहणं तदर्थानुसंवनोगो यस्य सः स
गुणस्य आत्मगुणोपेतस्य विषयस्मिन्निपयस्य सिद्धो सतां संप्रदायत्रय्यन्तगुरुचरितसमा

करवदरितविश्वः कश्चिदाचार्यदृष्ट्यामुषितनिखिलमोहो मूलमंत्रादिभोगः सगुणवि
षयसिद्धसंप्रदायंत्रय्यन्तगुरुचरितसिलहारीसूरिवृंदाभिवंद्यः इष्ट निर्विष्टं यतिसार्वभौम
वचसामावृत्तिभिर्यौवनं निर्वृतेतरपारतंत्र्यनिरयानीताः सुखं वासराः अंगीकृतसमस्ताऽ
सतिमसतां गर्वापिनिर्वापितः त्रेपायुष्मपिनोषिदं पतिदयादीक्षामुदीक्षामहे ॥६८

अयणोत्तरकालीनवृत्तिः सेवन्तिलमयाचितोपनतं तदुपरतीति शिलहारी अनेन शिलहा
रवृत्तिश्च सूचिता तादृशः कश्चिदस्ति चेत् सूरिवृंदैरपि अभिवंद्यो भवति इष्ट यतिसा
र्वभौमवचसां यतिराजवचसां आवृत्तिभिर्यौवनं निर्विष्टं गतं ननु विषयांतरैः वासराः नि
र्वृतः निराकृतः इतरपरातंत्र्यमेव निरयो नरकविशेषो येषां ते तथा संतः सुखं नीताः स

त्वक्रमेवार्थं विविच्य दर्शयति आस्तिकवान् शास्त्रविश्वासशाली निशितबुद्धिः शकता
र्थधारणशक्तः अनभ्यसूयः गुणदोषाविष्करणरहितः सताशक्तिस्मृत्यविरोधिनास्सं
प्रदायेन परिशुद्धमनाः निस्संशयहृदयः सदर्थीसक्तः अर्थविशेषं जिज्ञासुः संकेत
भीत्यारहितः तत्त्वेषु निस्सारग्रंथेषु अशक्तः पुरुषः यः सः शास्त्रतीअविछिन्न

आस्तिकवान्निशितबुद्धिरनभ्यसूयः सत्संप्रदायपरिशुद्धमनाः सदर्थीसंकेतभीति
रहितसत्त्वेषशक्तः सद्वर्त्तनीमनुविधास्यति शास्त्रतीनः ७० श्रीरामजीः

संप्रदायांसद्वर्त्तनीसन्मार्गमनुविधास्यतिसर्वंसमंजसं ७० रहस्यत्रयसारोयंवेंक
टेयविपश्चिता शारण्यदंपतिविद्वांसम्मतः समगृह्यत ७१ ॥ इति श्रीकवितार्कि
कसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदांताचार्यस्य कृतिषु अधिकारः
संग्रहस्समाप्तः ॥ ॥ ॥ ॥

32

[illegible]